लक्षणराजिः of ~~[illegible]~~ तिपभट्ट

and लघुन्यायवादाः त्रयः - Edited by K. E. Govindan - slightly pinholes and neatly repaired.

Tanjore, 1975.

1 copy

~~[illegible] in another packet~~.

99

91

1150

9

Bill No. 5/07-08

91

2008-0550

Indira Gandhi National Centre for the Arts

# LAKṢAṆARĀJIḤ

OF

TIPPABHAṬṬAḤ

AND

# LAGHUNYĀYAVĀDĀḤ TRAYAḤ

*Edited By*

**K. E. GOVINDAN**

*Nyāyaśiromaṇi, Śikṣāśastri,*

*Vidyāvāridhiḥ*

*Saṁskṛta Paṇḍitaḥ*

*Sarasvatī Mahāl Library, Thanjavur.*

Indira Gandhi National Centre for the Arts

*Published By*

Vidwan A. VADIVELAN,

*Honorary Secretary,*

FOR THE ADMINISTRATIVE COMMITTEE OF
THE TANJORE MAHARAJA SERFOJI'S SARASVATI MAHAL LIBRARY,
THANJAVUR.

Śaka 1897] [A. D. 1975

॥ श्रीः ॥

श्रीमत्तिप्पभट्टकृता

# ॥ लक्षणराजिः ॥

अज्ञातकर्तृकाः, लघुन्यायवादास्त्रयश्च

सरस्वतीमहाल् कोशागारसंस्कृतपण्डितेन

न्यायशिरोमणि–शिक्षाशास्त्रि–विद्यावारिधिबिरुदभाजा

**का. इ. गोविन्देन**

परिष्कृतः

Centre for the Arts

तञ्जापुर-सरस्वतिमहाल्-कोशागार-निर्वाहकसमित्याः

अवैतनिककार्यदर्शिभिः

विद्वान्. अ. वडिवेलन् महाभागैः

प्रकाशितः

शकाब्दः १८९७] [redacted] [क्रैस्तवाब्दः १९७५

SANS
181.44
TIP

DATA ENTERED
Date 25/07/08

KALANIDHI
Rare Book Collection
ACC No.: R-550
IGNCA Date: 26 3-08
Indira Gandhi National
Centre for the Arts

श्रीमते हयग्रीवाय नमः

# उपोद्घातः

अथेमं मुद्रापयित्वा प्रकाश्यते षड्दर्शनेष्वन्यतमस्य वैशेषिकतन्त्रस्य षट्पदार्थविवेचनस्य प्रकरणग्रन्थरूपा **लक्षणराजिः**। इयं च वैशेषिकतन्त्रबुभुत्सूनां सौकर्याय स्वपितुः वादीन्द्राभिधस्य चिट्टिभट्टविदुषः सकाशात् समधिगतमीमांसाद्वयतर्कशास्त्रेण **तिप्पभट्टाख्य**विपश्चिता न्यायाचार्योदयनकृतलक्षणावल्यनुसारिणी व्यरचि।

अस्य समयः प्रायः क्रैस्तवीयसप्तदशकोत्तरभागादष्टादशशतपूर्वभागे स्यादित्यभ्यूह्यते। यतः अत्रैव ग्रन्थे **आत्माश्रयदोष**निरूपणप्रस्तावे (२ पुटे) **हेत्वाभासान्तर्गतानैकान्तिक**-निरूपणप्रस्तावे (३२ पुटे) च प्रसिद्धस्य न्यायग्रन्थस्य **केशवमिश्रकृततर्कभाषा**ख्यस्य व्याख्यातुः दाक्षिणात्यस्य गोविन्ददीक्षितपुत्रस्य **गणेशदीक्षितस्य** पक्षमनूद्य खण्डयति। गणेश-दीक्षितस्य कालस्तावत् क्रैस्तवीयसप्तदशशतकमित्यैतिह्यासिकैः न्यरूपि। एतेन **तिप्पभट्टः** पूर्वोक्तसमये अवात्सीदिति निश्चिनुमः।

अस्मिन् कोशागारे लक्षणराजिमातृके द्वे उपलभ्येते। अत्रत्य सूचिकायां[1] अस्य B. 2270/D. 6577, B. 2338/D 6578 इति च व्यपदेशः कृतः। उभे अपि मातृके अबद्धास्पष्टाक्षरभूयिष्ठे भवतः यद्यपि, तथापि सम्पादनाय प्रथममातृका एव स्वीकृता। सम्पादनाय गृहीतमातृकायां सञ्जातसंशयदूरीकरणाय यत्र यत्र द्वितीयमातृका पर्यवेक्षिता तत्र तत्र विपरीतग्रन्थः अथवा ग्रन्थविच्छेदः उपलब्धः आसीत्। अतः द्वितीयया ईषदप्युपकारो नासीत्।

अस्य तिप्पभट्टाख्यविदुषः वैदुष्यं तावत् **संशय** (१२ पुटे) **प्रमा** (१४ पुटे) **पक्षता** (२२ पुटे) **व्याप्ति** (२५ पुटे) निरूपणानां परिशीलनेन ग्रन्थद्रष्टारः ज्ञास्यन्ति। अपि चास्मिन्नेव ग्रन्थे **आकाङ्क्षा**निरूपणप्रस्तावे (२१ पुटे) **न्यायाचार्यस्योदयनस्य** मतं, **अवयवनिरूपणे** (१९ पुटे) नव्यन्यायप्रवर्तकस्य **गङ्गेशोपाध्यायस्य** पक्षं, **केवलान्वयि-निरूपणे** (३४ पुटे) तत्त्वचिन्तामणिप्रकाशकर्तुः **रुचिदत्तमिश्रस्या**भिसन्धिं, **आत्माश्रयदोष**निरूपणे (२ पुटे) तथा **हेत्वाभास**निरूपणे (३२ पुटे) **गणेशदीक्षितस्या**भिप्रायं च खण्डयित्वा स्वमतं स्थापयति। अनेनाप्यस्य पाण्डित्यमवगम्यत एव।

प्रबन्धेऽस्मिन्नादौ लक्षणस्य पञ्चदोषान्निरूप्य, तदनन्तरं पदार्थतद्विभागादिकं प्रतिपाद्य

---

1. Descriptive Catalogue Vol XI P. 4765 and 4767,

गुणानिरूपणकाले बुद्धिनिरूपणमध्ये एव चत्वारि प्रमाणानि, तद्विभागांश्च पक्षप्रतिपक्षखण्डनपूर्वकं प्रसाध्य, तदनु सुखादिकं निरूप्य ग्रन्थं समापयति ।

अस्य ग्रन्थस्यान्ते लघुन्यायवादात्मकाः '**नवत्वसङ्ख्याविचारः**' '**आत्मत्वजातिविचारः**' '**त्वङ्मनोयोगस्य ज्ञानहेतुत्वखण्डनम्**' इति त्रयः ग्रन्थाः संयोजिताः । आकारे लघुत्वादेतेषां पार्थक्येन प्रकाशनमुपेक्ष्यात्रैव संयोजनं कृतमस्ति ।

ग्रन्थसम्पादनकर्मणि प्रथमतया प्रवर्तितस्य ममास्य सम्पादने तदा तदा पृष्टस्य संशयस्योत्तरदानेन सादरमनुगृहीतवद्भ्यः चतुश्शास्त्रपारङ्गतेभ्यः तिरुपतिस्थकेन्द्रीयसंस्कृतविद्यापीठे रीडर्स्थानमलङ्कुर्वद्भ्यः अस्मद्गुरुचरणेभ्यः **यन्. एस्. रामानुजताताचार्येभ्यः**, तथा मत्प्रियबन्धुजनेभ्यः न्यायवेदान्तविद्भ्यः **कृष्णमाचार्येभ्यश्च** धन्यवादान् समर्पयामि । एतत्प्रकाशनार्थमनुमतिं दत्तवद्भ्यः अवैतनिककार्यदर्शिभ्यः विद्वान् अ. वडिवेलन् महोदयेभ्यश्च हार्दं कार्तज्ञ्यं प्रकटयामि ।

नैसर्गिकबुद्धिप्रमादात्, मातृकायाः कीटजग्धत्वात्, मितप्रज्ञत्वाच्च ये दोषाः जाताः ते सर्वेऽपि कृपया विद्वज्जनैः क्षन्तव्या इत्यभ्यर्थये ॥

Indira Gandhi National
Centre for the Arts

आनन्द-शुक्लाष्टमी,
२१—३—७५.

इति सुधीजनविधेयः,
का. इ. गोविन्दाचार्यः.

# विषयानुक्रमणिका


| | पुटसङ्ख्या |
|---|---|
| मङ्गलाचरणम् | १ |
| ग्रन्थकरणप्रतिज्ञा | ,, |
| अव्याप्तिनिरूपणम् | ,, |
| अतिव्याप्ति ,, | ,, |
| असम्भव ,, | २ |
| आत्माश्रय ,, | ,, |
| व्यर्थविशेषण ,, | ,, |
| पदार्थ ,, | ,, |
| मतान्तरम् तत्खण्डनं च | ,, |
| पदार्थविभागः, अभावनिरूपणञ्च | ३ |
| अभावविभागः, अन्योन्याभाव ,, | ,, |
| संसर्गाभावनिरूपणम्, तद्विभागश्च | ,, |
| अत्यन्ताभाव ,, | ,, |
| प्रध्वंसाभाव ,, | ४ |
| प्रागभाव ,, | ,, |
| भावनिरूपणम्, तद्विभागश्च | ,, |
| द्रव्यनिरूपणम् | ,, |
| गुणनिरूपणम् | ५ |
| मतान्तरम्, तत्खण्डनं च | ,, |
| कर्मनिरूपणम् | ,, |
| मतान्तरम्, तत्खण्डनं च | ,, |
| सामान्यनिरूपणम् | ,, |
| मतान्तरम्, तत्खण्डनं च | ,, |
| विशेषनिरूपणम् | ६ |
| मतान्तरम्, तत्खण्डनं च | ,, |

| | पुटसङ्ख्या |
|---|---|
| समवायनिरूपणम् | ६ |
| द्रव्यविभागः | ,, |
| पृथिवीनिरूपणम् | ,, |
| जल निरूपणम् | ,, |
| तेजो ,, | ७ |
| वायु ,, | ,, |
| मतान्तरम्, तत्खण्डनं च | ,, |
| आकाशनिरूपणम् | ,, |
| काल ,, | ,, |
| दिङ्निरूपणम् | ,, |
| मतान्तरम् तत्खण्डनं च | ,, |
| आत्मनिरूपणम् | ८ |
| मनो ,, | ,, |
| गुणविभागः | ,, |
| सामान्यगुणनिरूपणम् | ,, |
| विशेषगुण ,, | ,, |
| सामान्यगुणविभागः | ,, |
| सङ्ख्यानिरूपणम् | ९ |
| परिमाण ,, | ,, |
| पृथक्त्व ,, | ,, |
| संयोग ,, | ,, |
| विभाग ,, | ,, |
| परत्व ,, | ,, |
| अपरत्व ,, | १० |
| गुरुत्व ,, | ,, |

| | पुटसङ्ख्या |
|---|---|
| नैमित्तिकद्रवत्व निरूपणम् | १० |
| वेग ,, | ,, |
| स्थितस्थापकनिरूपणम् | ,, |
| विशेषगुणविभागः | ,, |
| रूपनिरूपणम् | ,, |
| रस ,, | ११ |
| गन्ध निरूपणम् | ११ |
| स्पर्श ,, | ,, |
| शब्द ,, | ,, |
| बुद्धि ,, | ,, |
| स्मृति ,, | १२ |
| अनुभव ,, विभागश्च | ,, |
| संशय ,, | ,, |
| निश्चय ,, तद्विभागश्च | १४ |
| साक्षात्कार ,, ,, | ,, |
| प्रमा ,, | ,, |
| इन्द्रियत्वविचारः | १६ |
| इन्द्रियविभागः | १७ |
| घ्राणनिरूपणम् | ,, |
| रसननिरूपणम् | ,, |
| चक्षुर्निरूपणम् | ,, |
| श्रोत्र ,, | ,, |
| त्वङ् ,, | ,, |
| मनो ,, | ,, |
| अनुमिति,, | १८ |
| तद्भेदनिरूपणम् | ,, |
| मतान्तरम्, तत्खण्डनं च | ,, |

| | पुटसङ्ख्या |
|---|---|
| न्यायनिरूपणम् | १८ |
| अवयव ,, | १९ |
| अवयवविभागः | २० |
| प्रतिज्ञानिरूपणम् | ,, |
| हेतु ,, | ,, |
| उदाहरण ,, | ,, |
| मतान्तरं तत्खण्डनं च | ,, |
| उपनयनिरूपणम् | २१ |
| मतान्तरम्, तत्खण्डनं च | ,, |
| निगमननिरूपणम् | २१ |
| आकाङ्क्षा ,, | ,, |
| योग्यतानिरूपणम् | ,, |
| पक्षता ,, | २२ |
| व्याप्ति ,, | २५ |
| हेत्वाभास ,, | २९ |
| तद्भेद ,, | ३० |
| असिद्ध ,, | ३१ |
| तद्भेद ,, | ,, |
| आश्रयासिद्ध,, | ,, |
| स्वरूपासिद्ध ,, | ,, |
| व्याप्यत्वासिद्ध ,, | ,, |
| विरुद्ध ,, | ,, |
| अनैकान्तिक ,, | ,, |
| मतान्तरम्, तत्खण्डनं च | ३२ |
| अनैकान्तिकभेदनिरूपणम् | ,, |
| अनुपसंहारि ,, | ,, |
| असाधारण ,, | ,, |
| साधारण ,, | ,, |

| | पुटसङ्ख्या | | पुटसङ्ख्या |
|---|---|---|---|
| प्रकरणसमनिरूपणम् | ३२ | प्रयत्ननिरूपणम् | ४० |
| कालात्ययापदिष्ट ,, | ,, | धर्म ,, | ,, |
| सद्धेतुनिरूपणं, तद्भेदनिरूपणं च | ३३ | अधर्म ,, | ,, |
| अन्वयव्यतिरेकिनिरूपणम् | ,, | भावना ,, | ,, |
| केवलव्यतिरेकि ,, | ,, | नैमित्तिकद्रवत्व ,, | ,, |
| केवलान्वयि ,, | ,, | सांसिद्धिकद्रवत्व ,, | ,, |
| कारण ,, | ३४ | द्रवत्व ,, | ,, |
| कारणभेद ,, | ३६ | सत्ता ,, | ४१ |
| समवायिकारण ,, | ,, | द्रव्यत्व ,, | ,, |
| असमवायिकारण ,, | ,, | मतान्तरं तत्खण्डनं च | ,, |
| निमित्तकारण ,, | ३७ | तद्विभागनिरूपणम् | ,, |
| उपमिति ,, | ,, | पृथिवीत्व ,, | ,, |
| तद्विभागनिरूपणम् | ,, | अप्त्व ,, | ,, |
| शब्द ,, | ,, | तेजस्त्व निरूपणम् | ,, |
| तद्विभाग ,, | ,, | वायुत्व ,, | ,, |
| प्रमाण ,, | ,, | आत्मत्व ,, | ,, |
| तद्विभाग ,, | ३९ | मनस्त्व ,, | ,, |
| प्रत्यक्ष ,, | ,, | गुणत्व ,, | ,, |
| अनुमान ,, | ,, | तद्विभागनिरूपणम् | ,, |
| उपमान ,, | ,, | रूपत्व ,, | ,, |
| शब्दप्रमाणनिरूपणम् | ,, | रसत्व ,, | ,, |
| सुख ,, | ,, | गन्धत्व ,, | ,, |
| दुःखनिरूपणम् | ,, | स्पर्शत्व ,, | ,, |
| इच्छा ,, | ४० | संख्यात्व ,, | ,, |
| द्वेष ,, | ,, | परिमाणत्व ,, | ,, |


Indira Gandhi National Centre for the Arts

| | पृष्ठसंख्या | | पृष्ठसंख्या |
|---|---|---|---|
| पृथक्त्वनिरूपणम् | ४२ | इच्छात्वनिरूपणम् | ४४ |
| संयोगत्व ,, | ४३ | द्वेषत्व ,, | ,, |
| विभागत्व ,, | ,, | प्रयत्नत्व ,, | ,, |
| परत्व ,, | ,, | धर्मत्व ,, | ,, |
| अपरत्व ,, | ,, | अधर्मत्व ,, | ,, |
| गुरुत्व ,, | ,, | संस्कारत्व ,, | ४५ |
| द्रवत्वनिरूपणम् | ,, | कर्मत्व ,, | ,, |
| स्नेहत्व ,, | ,, | शुद्धाशुद्धपट्टिका | ४६ |
| शब्दत्व ,, | ४४ | सूचना | ,, |
| बुद्धित्व ,, | ,, | नवत्वसङ्ख्याविचारः | १ |
| सुखत्व ,, | ,, | आत्मत्वजातिविचारः | ३ |
| दुःखत्व ,, | ,, | त्वङ्मनोयोगस्य ज्ञानहेतुत्वखण्डनम् | ८ |


Indira Gandhi National Centre for the Arts

श्रीमते हयग्रीवाय नमः

श्रीमत्तिप्पभट्टकृता

# लक्षणराजिः

गिरिजामोदकं विघ्ननोदकं करमोदकम् ।
स्तौमीष्टदायकं लम्बनायकं गणनायकम् ॥

भक्तानुरक्तां नित्यां सद्भूषणां मणिभूषणाम् ।
वेणीविलसितां वाणीमेणीदृशमहं भजे ॥

सर्वदा सर्वदात्रे सद्धर्मिणे परमात्मने ।
असंक्लिष्टाय कृष्णाय विष्णवे जिष्णवे नमः ॥

सर्वतन्त्रनिपुणस्य वादिन-
श्शिङ्गिभट्टविदुषः सुतेन च ।
तिप्पयाख्यविदुषाऽर्थसिद्धये
कथ्यते कलितलक्षणावलिः ॥

लक्षणस्य तावत् **पञ्च दोषाः**—अव्याप्त्यतिव्याप्त्यसम्भवात्माश्रयव्यर्थविशेषणभेदात् ।

## अव्याप्तिनिरूपणम्

तत्र लक्ष्यतावच्छेदकाव्याप्यत्वे सति लक्ष्यतावच्छेदकसामानाधिकरण्यमव्याप्तिः । प्राथमिकविशेषणं सल्लक्षणातिव्याप्तिवारकम् । इतरदसम्भववारकम् । यथा गोः कपिलत्वमिति । न च लक्ष्यैकदेशावर्तनमव्याप्तिरिति वाच्यम्, असम्भविसाधारणत्वात् । न च लक्ष्यैकदेशवृत्तित्व-विशेषणमुक्तमेव लक्षणमिति वाच्यम् । प्रतियोगितदभावयोरेकत्रासम्भवात् ।

## अतिव्याप्तिनिरूपणम्

लक्ष्यतावच्छेदकतदभावोभयसामानाधिकरण्यमतिव्याप्तिः । आद्यमसम्भववारकम् । इतरत्सल्लक्षणातिव्याप्तिवारकम् । न चालक्ष्ये लक्षणदर्शनमतिव्याप्तिरिति वाच्यम्; असम्भवि-गतत्वात् ।

## असम्भवनिरूपणम्

लक्ष्यतावच्छेदकासामानाधिकरण्यमसम्भवः। न च लक्ष्ये काप्यवर्तनमसम्भव इति वाच्यम्; कापीत्येतस्य वैयर्थ्यात्।

## आत्माश्रयनिरूपणम्

लक्षणोक्त्यवसरे पर्यायशब्दप्रतिपाद्यत्वमात्माश्रयः। यथा कारणस्य किं लक्षणं इति प्रश्ने जनकत्वमिति। न चास्यादोषत्वमुक्ताव्याप्त्यतिव्याप्त्यसंभवानामन्यतमासंभवेनोक्तलक्षणस्य समीचीनत्वापत्तेः। न चापसिद्धान्तः; **तर्कभाषोक्त**कारणलक्षणदूषणप्रस्तावे **गणेश्वर-टीकायां** — * "**ननु पूर्ववर्तित्वं प्रागभावावच्छिन्नसमयवर्तित्वम्**" इत्याशङ्काग्रन्थे आत्माश्रये दोषस्योक्तत्वात्।

## व्यर्थविशेषणनिरूपणम्

अव्याप्त्यतिव्याप्त्यसंभवान्यतमावारकविशेषणत्वं व्यर्थविशेषणत्वम्। यथा प्रमेयत्वे सति साक्षादिमत्त्वम्। न चास्यादोषत्वमुदाहृतलक्षणस्य समीचीनत्वापत्तेः। न चापसिद्धान्तः, (तत्र) तत्र ग्रन्थे ग्रन्थकारैरेतावन्मात्रस्य लक्षणत्वे शेषवैयर्थ्यादित्यादेरुक्तत्वात्।

## पदार्थनिरूपणम्

साक्षात्कारविषयत्वं पदार्थसामान्यलक्षणम्। विषयत्वमित्युक्ते शशविषाणमिति शब्द-जन्यज्ञानविषयशशविषाणेऽतिव्याप्तिः। तदर्थं साक्षात्कारपदम्। न च शशविषाणस्यासदर्थत्वेन ज्ञानाविषयत्वात् नातिप्रसङ्ग इति। "**अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति ही**"ति वचनात् तत्रापि ज्ञानविषयत्वस्य सत्त्वात् विषयत्वपदमव्याप्तिवारकम्। यद्वा ईश्वरज्ञानविषयत्वं पदार्थसामान्यलक्षणम्। इदं शशविषाणवारकम्। विषयत्वपदमव्याप्तिवारकम्।

## मतान्तरं तत्खण्डनं च

**यत्तु** — प्रमाणविषयः पदार्थ इति **तन्न** — प्रमाया यथार्थानुभवरूपत्वेन तदेकदेशयथार्थ-ज्ञानविषयत्वस्य लक्षणत्वे दो(शे)षवैयर्थ्यात्; विचार्यमाणे तदपि (न) लक्षणं, यथार्थपद-वैयर्थ्यात्। न च शशविषाणरूपासदर्थे ज्ञानविषयत्वसत्त्वेन तदर्थं यथार्थपर(पद)मिति वाच्यम्। विकल्पासहत्वात्। तथाहि — शशविषाणे ज्ञानविषयत्वादस्तीति ज्ञानं प्रमा वा भ्रमो वा। नाद्यः

---

* B. 2226/D, 6309 संख्याक मातृकायां सप्तमपुटे पूर्वभागे दशमपङ्क्तिरियम्। मुद्रितपुस्तका-लाभात् मातृका स्वीकृता।

यथार्थपददानेऽप्यतिप्रसङ्गतादवस्थ्यात् । न द्वितीयः, तत्र ज्ञानविषयत्वस्यासत्त्वेन यथार्थपदोपादानानुपपत्तेः । ज्ञानविषयत्वमपि न लक्षणम् । शशविषाणेऽतिव्याप्तेः ।

## पदार्थविभागः, अभावनिरूपणं च

पदार्थो द्विविधः—अभावभावभेदात् । तत्राभावस्य न तावदर्थोल्लिखितधीविषयत्वं लक्षणम् । 'घटाभावो नास्ती'ति प्रतीतौ घटस्यैव विषयत्वेन तत्रातिव्याप्तेः । नापि प्रतियोगिज्ञानाधीनजनकत्वं सप्रतियोगिसंयोगादावतिव्याप्तेः । भावभिन्नत्वमभावत्वं च द्रव्यादिविषयान्यतमत्वमित्यपि न समञ्जसम् । द्रव्यादिविषयान्यतमत्वस्य लक्षणस्य केवलव्यतिरेकित्वेन तदेकदेशेनैव द्रव्यभेदसाधने दो(शे)षवैयर्थ्यात् । अन्यतमत्वस्याभावगर्भत्वेनैव निर्वक्तव्यत्वेन चक्रकाश्रयश्च ।

**अत्रोच्यते**—समुदायभिन्नत्वे सति समुदायान्यत्वमभाव इत्यात्माश्रयः, तथापि भिन्नत्वमधिकरणस्वरूपम्, अतो नात्माश्रयः । अन्यथा चतुर्विधाभावानामन्योन्यभेदो न स्यात् । तेषामतिरिक्तान्योन्याभावा इत्यात्माश्रयाङ्गीकारात् ।

यद्वा भावभिन्नत्वमभावलक्षणम् । भावलक्षणं त्वग्रे वक्ष्यामः ।

## अभावविभागः अन्योन्याभावनिरूपणं च

अभावो द्विविधः—अन्योन्याभावसंसर्गाभावभेदात् । अत्र स्वप्रतियोग्यधिकरणदेशकालवृत्त्यभावत्वमन्योन्याभावस्य लक्षणम् । कालपदं प्रागभाव (वारकम्) । देशपदमत्यन्ताभावस्य व्यावर्तकम् ।

## संसर्गाभावनिरूपणं, तद्विभागश्च

अन्यान्या (भावभिन्ना)भावत्वं संसर्गाभावस्य लक्षणम् । संसर्गाभावस्त्रिविधः—अत्यन्ताभावप्रध्वंसाभावप्रागभावभेदात् ।

## अत्यन्ताभावनिरूपणम्

तत्र स्वप्रतियोगिवृत्त्यभावत्वमत्यन्ताभावस्य लक्षणम् । अत्राद्यपदं प्रागभावादिवारकम् । अन्त्यं संयोगवारकम् ।

यद्वा स्वप्रतियोग्यधिकरणकालवृत्तित्वे सति संसर्गाभावत्वमभावस्य लक्षणम् । आद्यं तु ध्वंसादिवारकम् । अन्त्यमन्योन्याभाववारकम् ।

## प्रध्वंसाभावनिरूपणम्

स्वप्रतियोगिजन्याभावत्वं वा प्रध्वंसस्य लक्षणम् ।

## प्रागभावनिरूपणम्

अदृष्टानधिकरणकालवृत्त्यकालवृत्त्यभावत्वं वा प्रागभावस्य लक्षणम् ।

## भावनिरूपणं तद्विभागश्च

समवायनिरूपिताधाराधेयाभावाश्रयत्वं भावस्य लक्षणम् । भावः षड्विधः — द्रव्यगुणकर्मसामान्यविशेषसमवायभेदात् ।

## द्रव्यनिरूपणम्

न तावत् गुणाश्रयत्वं द्रव्यस्य लक्षणम् । प्रथमक्षणावच्छिन्नघटादावव्याप्तेः । न च गुणाश्रयत्वं नाम गुणात्यन्ताभावानधिकरणत्वम्, अतो नोक्तदोष इति वाच्यम् । कालदिशोः सर्वाधारत्वेनात्राव्याप्तेः ।

किं च सकलगुणात्यन्ताभावानधिकरणत्वं वा यत्किंचिद्गुणात्यन्ताभावानधिकरणत्वं वा । नाद्यः; सकलगुणानामेकत्रासत्त्वेनासम्भवापत्तेः । न द्वितीयः; सकलद्रव्यस्य संयोगाभावाधारत्वेनासम्भवापत्तेः । गुणात्यन्ताभावेऽतिव्याप्तिरित्यपि दूषणं द्रष्टव्यम् ।

ननु गुणाश्रयत्वं गुणात्यन्ताभावानधिकरणत्वमिति नोच्यते, किन्त्व[येना]तिव्याप्तिस्स्यात् । किं तु गुणात्यन्ताभावविरोध्यधिकरणत्वम् । तथा च कालदिक्प्रथमक्षणावच्छिन्नघटेषु नाव्याप्तिः । एषां गुणात्यन्ताभावविरोधिगुणाद्याधारत्वादिति चेत् — मैवम् — गुणैतत्प्रागभावप्रध्वंसानां गुणात्यन्ताभावविरोधित्वं किं तदनधिकरणाधिकरणत्वं तदधिकरणानधिकरणत्वं वेति विकल्पद्वयेऽपि कालदिशोरव्याप्तितादवस्थ्यात् । कालगुणदिग्वृत्तिगुणतत्प्रागभावप्रध्वंसानां तदनधिकरणाधिकरणत्वस्य तदधिकरणानधिकरणत्वस्य वा वक्तुमशक्यत्वादिति ।

**अत्रोच्यते** — सर्वाधारताप्रयोजकीभूतसंबन्धान्यसंबन्धेन गुणत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावानधिकरणत्वं द्रव्यस्य लक्षणम् । गुणत्वपदमभाववारकम् । सर्वाधारतेत्यादिविशेषणं कालादावव्याप्तिवारकम् । अत्यन्तपदमसम्भववारकम् । गुणत्वावच्छिन्नप्रतियोगिताकेति विशेषणं सकलगुणात्यन्ताभावेत्यादिविकल्पद्वयसम्भवितासम्भववारकम् । गुणात्यन्ताभावे नातिव्याप्तिः । गुणात्यन्ताभावस्य गुणात्यन्ताभावरूपत्वेन तत्र लक्षणस्यासत्त्वात् ।

## गुणनिरूपणम्

द्रव्यत्वव्यधिकरणनित्यत्वसमानाधिकरणजातित्वं गुणलक्षणम् । द्रव्यत्वव्यधिकरणपदं [द्रव्या]तिव्याप्तिवारकम् । नित्यत्वसमानाधिकरणेति पदं कर्मव्यावर्तकम् ।

### मतान्तरं, तत्खण्डनं च

**यत्तु** — कर्मान्यत्वे सति जातिमात्राश्रयत्वं गुणलक्षणमिति — **तन्न** — गुणस्य जात्यतिरिक्ताभावाधारत्वेन तत्रासंभवात् । न च मात्राचा(?)गुणो व्यावर्त्यते; तथा च गुणानाश्रयत्वे सति जात्याश्रयत्वं तदर्थ इति वाच्यम्, आत्माश्रयात् ।

## कर्मनिरूपणम्

अनित्यवृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वं कर्मणो लक्षणम् । मात्रपदं घटे व्यावर्तकम् । सत्तासाक्षात्पदं पटे वारकम् ।

### मतान्तरं, तत्खण्डनं च

**यत्तु** — संयोगविभागद्वयासमवायिकारणत्वं कर्मणो लक्षणम् — **तदसत्** — क्रियाक्रियातो विभागः, विभागात्पूर्वसंयोगनाशादुत्तरसंयोगोत्पत्तिरिति क्षणगणनया कर्मणः संयोगं प्रति पूर्वक्षणवृत्तित्वाभावात् क्षणगणनयेत्युक्तमयुक्तम् । क्षणलक्षणस्य वक्तुमशक्यत्वादिति चेत् — न । द्व्यणुकासमवायिकारणविनाशकविभागप्रागभावसंबन्धिकर्मावच्छिन्नकालत्वस्य क्षणलक्षणत्वात् । न चाभावेन क्रियया यः संयोगो जायते तत्संयोगं प्रति क्रियायाः पूर्वपक्ष[क्षण]वृत्तित्वसंभवात् नोक्त दोष इति वाच्यम् । तत्संयोगजनककर्मकालान्तरभाविविभागजनककर्मणोः भिन्नभिन्नत्वेनैकव्यक्तौ तदभावात् ।

## सामान्यनिरूपणम्

नित्यत्वे सति बहुसमवेतत्वं सामान्यस्य लक्षणम् । बहुपदं जलपरमाणुरूपेऽतिव्याप्तिवारकम् । आद्यविशेषणं पटादावतिव्याप्तिवारकम् । समवेतपदं पटान्योन्याभाववारकम् ।

### मतान्तरं, तत्खण्डनं च

**यत्तु** — नित्यमेकमनेकानुगतं सामान्यमिति — **तदसत्** — समवाये त्वतिव्याप्तेः । न च समवायव्यावृत्त्यर्थमनुगतपदं समवायपरमिति वाच्यम् । एकपदव्यर्थत्वात् । एकत्वसङ्ख्याया द्रव्यमात्रवृत्तित्वेन जातावसंभवाच्च । किं च सत्ताद्रव्यत्वगुणकर्मत्वादिबहुजातीनां सत्त्वात् तत्र जातौ सुतरामसम्भवः ।

## विशेषनिरूपणम्

जातिजातिमद्भिन्नत्वे सति समवेतत्वं विशेषस्य लक्षणम् । जातिपदं जातिवारकम् । जातिमत्पदं कर्मवारकम् ।

### मतान्तरं तत्खण्डनं च

**केचित्** — अतद्द्रव्यावृत्तिधीजनकत्वं विशेषत्वमिति वदन्ति । **तन्न** — अदण्डि-व्यावृत्तिबुद्धिजनके दण्डेऽतिव्याप्तेः ।

## समवायनिरूपणम्

ननु समवायस्य किं लक्षणम्? न तावत् सम्बन्धत्वम्, विशेषणविशेष्यभावादावतिव्याप्तेः । नापि मुख्यसंबन्धत्वम्, संयोगेऽतिव्याप्तेः । नापि नित्यत्वविशेषितम् एतदेव लक्षणमस्त्विति वाच्यम् । मुख्यसंबन्धत्वस्य निर्वक्तुमशक्यत्वात् । न च संबन्धो हि संबन्धिभ्यां भिन्नः । ततस्तावाश्रितश्चैकश्चेत्येतदेव नित्यमुख्यसंबन्धलक्षणमिति वाच्यम् । विभागेऽतिव्याप्तेः । न च संबन्धत्वमेव तत्र नास्तीति वाच्यम् । विभागत्वग्रहदशायां विभागस्यापि संबन्धत्वेनाङ्गीकारात् तत्रातिव्याप्तिः । नापि प्रतियोगित्वम्, अभावसाधारण्यात् ।

**अत्रोच्यते** — घटघटत्ववृत्तित्वे सति घटघटत्वभिन्नत्वे सति घटत्वप्रतियोगिकत्वं समवायस्य लक्षणम् । घटघटत्वभिन्न इति विशेषणं तद्वृत्तिघटत्वादावतिव्याप्तिवारकम् । घटवृत्तित्व इत्येतत् घटान्योन्याभाववारकम् । घटे वृत्तिविशेषणं घटत्वात्यन्ताभाववारकम् । रूपानुयोगिकत्वे सति रूपत्वप्रतियोगिकत्वं समवायस्य लक्षणम् । रूपानुयोगिकत्व इति पदं रूपाभावेऽतिव्याप्तिवारकम् । इतरद्रूपात्यन्ताभावस्य स्वरूपत्वेन रूपानुयोगिकात्यन्ताभावेऽतिव्याप्तिवारकम् ।

## द्रव्यविभागः

सामान्यलक्षणलक्षितं द्रव्यं नवविधम् — पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनोभेदात् ।

## पृथिवीनिरूपणम्

तत्र गन्धवत्त्वं पृथिव्या लक्षणम्, पृथिवीत्वं वा पृथिवीलक्षणम् । स्नेहाभावसमानाधिकरणगुरुत्वं वा रूपसमानाधिकरणानुष्णाशीतस्पर्शवत्त्वं वा पृथिव्या लक्षणम् ।

## जलनिरूपणम्

अप्त्वं, स्नेहो वा, सांसिद्धिकद्रवत्वं वा, शीतस्पर्शो वा, गन्धात्यन्ताभावसमानाधिकरणगुरुत्वं वा [जलस्य] लक्षणम् ।

## तेजोनिरूपणम्

तेजस्त्वं, उष्णस्पर्शो वा, भास्वररूपं वा तेजसो लक्षणम् ।

## वायुनिरूपणम्

रूपात्यन्ताभावसमानाधिकरणस्पर्शो वा वायोर्लक्षणम् ।

## मतान्तरं, तत्खण्डनं च

**यत्तु** — अपाकजानुष्णाशीतस्पर्शो वायोर्लक्षणमिति — **तन्न** — तन्तुजन्यस्पर्शवति पटेऽतिव्याप्तेः ।

## आकाशनिरूपणम्

संयोगाजन्यजन्यविशेषगुणवत्त्वे सति नित्यत्वमाकाशत्वशब्दसमवायिकारण[त्व]शब्दगुणत्वं वाऽऽकाशस्य लक्षणम् । तदेकदेशशब्दस्यैव लक्षणत्वे शेषवैयर्थ्यात् । न चास्य पक्षे वैयर्थ्यं शङ्कनीयम् । संयोगाजन्यपद-जन्यपद-विशेषपद-नित्यत्वपदानां क्रमेणात्मजलपरमाणु-काल-घटेष्वतिव्याप्तिवारकत्वात् ।

## कालनिरूपणम्

समीपस्थपरत्वासाधारणकारणत्वे सति विभुत्वं कालस्य लक्षणम् । समीपस्थपदं दिश्यतिव्याप्तिवारकम् । असाधारणपदमीश्वरेऽतिव्याप्तिवारकम् । विभुत्वपदं स्थविरवारकम् (?) ।

## दिङ्निरूपणम्

विशेषगुणवद्भिन्नत्वे सति कालान्यत्वे सति विभुत्वं दिशो लक्षणम् । विभुत्वपदं मनोव्यावर्तकम् । आद्यपदमात्मवारकम् । कालान्यत्वपदं कालवारकम् ।

## मतान्तरं, तत्खण्डनं च

**यत्तु** — आदित्यसंयोगोत्पाद्यपरत्वापरत्वसमवायिकारणाधारत्वे सति परत्वापरत्वानाधारत्वं दिशो लक्षणम् । आदित्येत्यादिलक्षणविशेषणं कालवारकमिति — **तदसत्** — अपरत्वासमवायिकारणाधारत्वमात्रेणाकाशादित्यादिव्युदासे संभवति शेषवैयर्थ्यात् । आदित्यस्य सावयवत्वेनानित्यत्वे सिद्धे आदित्यनिष्ठकालकृतपरत्वा[दे]रादित्यसंयोगजन्यत्वेनोक्तलक्षणस्य कालेऽतिप्रसक्तेश्च ।

## आत्मनिरूपणम्

समवायसंबन्धेन ज्ञानवत्त्वमात्मनो लक्षणम्। तेन विषयविषयाभावसंबन्धेन ज्ञानवत्त्वं घटेऽस्तीति दूषणमपास्तम्।

## मनोनिरूपणम्

ज्ञानासमवायिकारणाश्रयत्वे सति मूर्तत्वं मनसो लक्षणम्। ज्ञानपदं तन्तुवारकम्।

## गुणविभागः

सामान्यलक्षणलक्षितो गुणो द्विविधः — सामान्यविशेषगुणभेदात्।

## सामान्यगुणनिरूपणम्

तत्र सामान्यगुणस्य लक्षणमुच्यते — जलेतरसमवेतत्वरहितजात्यधिकरणभिन्नत्वे सत्यात्ममनस्संयोगभिन्नत्वे सत्येकेन्द्रियमात्रग्राह्यजात्यधिकरणभिन्नगुणत्वं सामान्यस्य लक्षणम्। स्नेहसांसिद्धिकद्रवत्वव्यावृत्त्यर्थं जलेतरेत्यादिविशेषणम्। आत्ममनस्संयोगजेत्यादिविशेषणं धर्माधर्मवारकम्। एकेन्द्रियेत्यादिविशेषणं रूपव्यावर्तकम्। यद्यप्येकेन्द्रियेत्यत्र सामान्यगुणलक्षणप्रविष्टेन्द्रियस्य शब्देतरोद्भूतविशेषगुणानाश्रयत्वस्वरूपत्वाङ्गीकारे तत्प्रविष्टविशेषगुणत्वस्य सामान्यभिन्नगुणत्वरूपत्वेन निर्वक्तव्यत्वेनात्माश्रयः। तथा च स्मृत्यजनकेत्यादिस्वरूपाङ्गीकारे वाऽतीन्द्रियत्वस्वीकारे वा न कश्चिद्दोष इति।

## विशेषगुणनिरूपणम्

सामान्यगुणभिन्नगुणत्वं विशेषगुणस्य लक्षणम्। गुणत्वपदमभावव्यावर्तकम्। इतरत्सामान्यगुणव्यावर्तकम्। यद्वा गुरुत्वभिन्नत्वे स्पर्शसांसिद्धिकद्रवत्वस्नेहभावनान्यत्वगिन्द्रियग्राह्यगुणत्वावान्तरजात्यधिकरणभिन्नगुणत्वं विशेषगुणलक्षणम्। आद्यपदं गुरुत्ववारकम्। स्पर्शेत्यादिविशेषणं स्पर्शादावव्याप्तिवारकम्। विशेषगुणस्य स्पर्शादेस्त्वगिन्द्रियग्राह्या या गुणत्वावान्तरजातिः तदधिकरणभिन्नत्वाभावात्। त्वगिन्द्रियग्राह्यपदं त्वसम्भववारकं द्रव्यवारकम्। केनचित् द्रव्यविभाजकोपाध्यवच्छिन्नेन (?) एकत्र व्यावर्तकगुणत्वं विशेषगुणस्य लक्षणमुक्तमयुक्तम् — विशेषगुणे रूपेऽव्याप्तेः।

## सामान्यगुणविभागः

सामान्यगुण एकादशविधः — सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वनैमित्तिकद्रवत्ववेगस्थितस्थापकभेदात्।

## सङ्ख्यानिरूपणम्

तत्र द्व्यणुकपरिमाणासमवायिकारण ... समानाधिकरणे गुणत्वावान्तरजात्यधिकरणत्वं सङ्ख्यालक्षणम् । अधिकरणमित्युक्ते प्रमेयत्वाधिकरणाभावेऽतिप्रसङ्गः, तदर्थं जातीति । तावत्युक्ते द्रव्येऽतिव्याप्तिः, तदर्थं गुणत्वावान्तरेति । द्व्यणुकेत्यादिविशेषणं संयोगादिवारकम् । समवायपदमीश्वरज्ञानेऽतिव्याप्तिवारकम् । द्व्यणुकपदं परिमाणपदं द्व्यणुकासमवायिकारणसंयोगवारकम् ।

## परिमाणनिरूपणम्

द्विष्ठभिन्नत्वे सति तूलपिण्डजन्यतासमानाधिकरणकालसमवेतसमवेतगुणत्वावान्तरजात्याधारत्वं परिमाणलक्षणम् । जात्याधारत्वपदं कर्मण्यतिव्याप्तम्, अतो गुणत्वावान्तरेति । तावन्मात्रं रूपे गतम्, अतः कालसमवेतेति । द्वितीयसमवेतपदमसम्भववारकम् । आद्यसमवेतपदमपि तथै । तूलपिण्डसंयोगजन्यतासमानाधिकरणपदं कालपृथक्त्ववारकम् । एतत्सर्वं कालसंयोगगतम्; अ ो द्विनिष्ठेत्यादि ।

## पृथक्त्वनिरूपणम्

विभागावृत्तिपरिमाणजनकत्वासमानाधिकरणकालसमवेतसमवेताधारत्वं पृथक्त्वस्य लक्षणम् । समवेताधारत्वमित्युक्ते कालेऽतिव्याप्तिः, तदर्थं समवेतपदम् । तावन्मात्रे कर्मण्यतिव्याप्तिः, अतः कालेति । परिमाणजनकत्वासमानाधिकरणेति पदं सङ्ख्यापरिमाणसंयोगेष्वतिव्याप्तिवारकम् । विभागावृत्तिविशेषणं कालविभागेऽतिव्याप्तिवारकम् ।

## संयोगनिरूपणम्

ज्ञानासमवायिकारणतासमानाधिकरणगुणत्वावान्तरजातिमत्वं संयोगस्य लक्षणम् । ज्ञानपदं रूपादावतिव्याप्तिवारकम् । असमवायिपदस्याप्येतदेव प्रयोजनम् ।

## विभागनिरूपणम्

कर्मजनकावृत्तिकर्मजन्यवृत्तिगुणत्वावान्तरजातिमत्वं विभागस्य लक्षणम् । आद्यविशेषणं संयोगवारकम् । इतरत् संख्यादिव्यावर्तकम् । कर्मजन्यवृत्तिपदं रूपादिवारकम् ।

## परत्वनिरूपणम्

अवधिपदार्थे संबन्धिसर्वाधारपदापेक्षयाऽधिकसर्वाधारपदार्थासाधारणनिमित्तकं परत्वस्य लक्षणम् । असाधारणपदं घटादावतिव्याप्तिवारकम् । निमित्तपदं कालसंयोगेऽतिव्याप्तिवारकम् । अवधिपदार्थेत्यादिविशेषणमवधिपरत्वे ... व्याप्तिवारकम् ।

## अपरत्वनिरूपणम्

अपरपदार्थसंबन्धिसर्वाधारपदार्थापेक्षया ...सर्वाधारपदार्थासाधारणनिमित्तकत्वमपरत्वस्य लक्षणम्। अल्पपदं परत्वादिवारकम्। शेषं पूर्ववत्। सर्वाधारपदार्थेत्यनेन कालकृतपरत्वादिकृतमपरत्वसंग्रहो जातः। सर्वाधारशब्दस्य कालदिशोरेकवाचित्वात्। कालदिशोः सूर्यपरिवाहूदयेनाल्पत्वेन चाधिकत्वालत्वे द्रष्टव्ये इति भावः।

## गुरुत्वनिरूपणम्

संयोगाजन्यत्वे सतीन्द्रियग्राह्यगुणत्वावान्तरजात्यधिकरणगुणत्वं गुरुत्वस्य लक्षणम्। गुणरूपत्वमित्युक्ते रूपेऽतिव्याप्तिः, अत उक्तं गुणत्वावान्तरजात्यनधिकरणेति। तावत्युक्तेऽसम्भवः अत इन्द्रियग्राह्येति। गुणत्वावान्तरपदमसम्भववारकम्। आद्यपदं धर्मादिवारकम्।

## नैमित्तिकद्रवत्वनिरूपणम्

विश्ववृत्तितेजस्संयोगजन्यत्वे सत्यद्विष्ठसामान्यगुणत्वं नैमित्तिकद्रवत्वस्य लक्षणम्। सामान्यगुणत्वपदं पार्थिवरूपेऽतिव्याप्तिवारकम्। अद्विष्ठपदं संयोगवारकम्। आद्यविशेषणं परत्वापरत्वादिवारकम्।

## वेगनिरूपणम्

क्रियाजन्यत्वे सति विभुसमवेतवृत्तिजात्याधारत्वं वेगस्य लक्षणम्। जात्याधारत्वमित्युक्ते संयोगेऽतिव्याप्तिः, तदर्थं विभ्वित्यादि। तावत्युक्ते रूपेऽतिव्याप्तिः। अतः क्रियेत्यादि।

## स्थितिस्थापकनिरूपणम्

कारणगुणपूर्वकवृत्तिसंस्कारत्वावान्तरजातिमत्त्वं स्थितिस्थापकस्य लक्षणम्। प्रथमविशेषणं भावनावेगवारकम्।

## विशेषगुणविभागः

विशेषगुणः षोडशविधः—रूपरसगन्धस्पर्शशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनासांसिद्धिकद्रवत्वस्नेहभेदात्।

## रूपनिरूपणम्

तत्र रूपस्य लक्षणमुच्यते—चक्षुर्मात्रग्राह्यजातिमत्त्वं वा, वायुसमवेतावृत्तिवह्निसमवेतवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं वा रूपस्य लक्षणम्। प्रथमलक्षणे मात्रपदं ... वारकम्। द्वितीयलक्षणगतप्रथमविशेषणं स्पर्शवारकम्। द्वितीयविशेषणं धर्मादिवारकम्। गुणत्वसाक्षात्पदमुष्णस्पर्शवारकम्।

## रसनिरूपणम्

तेजस्समवेतावृत्तिस्नेहान्यजलविशेषणगुणवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं, रसनाग्राह्यजातिमत्त्वं वा रसस्य लक्षणम् । प्रथमलक्षणप्रविष्टप्रथमपदं रूपादिवारकम् । स्नेहान्यपदं स्नेहवारकम् । विशेषपदं गुरुत्ववारकम् ।

## गन्धनिरूपणम्

घ्राणग्राह्यजातिमत्त्वं वा, जलवृत्त्यवृत्तिपृथिवीवृत्तिवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं वा गन्धस्य लक्षणम् । साक्षात्पदं जलवृत्त्यवृत्तिरूपत्वावान्तरजातिनीलत्ववति रूपेऽतिव्याप्तिवारकम् ।

## स्पर्शनिरूपणम्

त्वङ्मात्रग्राह्यजातिमत्त्वं स्पर्शस्य लक्षणम् । अत्र मात्रपदं पटे वारकम् । विशेषगुणवृत्तिगुणत्वावान्तरजातिमत्त्वं वा स्पर्शस्य लक्षणम् । विशेषपदं संयोगादिवारकम् ।

## शब्दनिरूपणम्

श्रोत्रग्राह्यजातिमत्त्वं वा विशेषगुणत्वे सत्याकाशसमवेतत्वं वा शब्दस्य लक्षणम् । ननु शब्दगुणकत्वमाकाशत्वं, शब्दसमवायिकारणत्वमिति पक्षद्वयेऽपि आकाशलक्षणे शब्दत्वेन रूपेण शब्दप्रवेशात्, उक्तरीत्या शब्दलक्षणे आकाशत्वेन रूपेणाकाशस्य प्रवेशाच्चान्योन्याश्रयादिदं लक्षणमसङ्गतमिति चेत्—न । संयोगाजन्यजन्यविषयगुणत्वे सति नित्यत्वमाकाशत्वमिति प्रागेव निरुक्तत्वात् ।

## बुद्धिनिरूपणम्

इन्द्रियत्वेनेन्द्रियजन्यत्वसमानाधिकरणगुणत्वावान्तरजात्यधिकरणत्वं बुद्धिलक्षणम् । अधिकरणयत्किंचिदधिकरणभावेऽतिव्याप्तिः; अत उक्तं जातीति । तावत्युक्ते द्रव्येऽतिप्रसक्तिः, तदर्थं गुणत्वावान्तरेति । तावन्मात्र उच्यमाने धर्माधर्मयोरतिव्याप्तिः, तद्व्युदासायेन्द्रियजन्यत्वसमानाधिकरणेति । ईश्वरज्ञानानुमित्योरव्याप्तिवारकं समानाधिकरणपदम् । एतावन्मात्रमिन्द्रियसमवेतसंयोगेऽतिव्याप्तिः, अत उक्तमिन्द्रियत्वेनेति ।

नन्वेतस्मिन् बुद्धिलक्षणे शब्देतरोद्भूतगुणानाश्रयत्वे सति ज्ञानकारणमनस्संयोगाश्रयत्वं वा, स्मृत्यजनकज्ञानकारणमनस्संयोगाश्रयत्वरूपं वेन्द्रियत्वं प्रविष्टं, इन्द्रियलक्षणे ज्ञानं प्रविष्टमित्यन्योन्याश्रयादिदं लक्षणं वक्तुं न शक्यत इति चेत्—न । साक्षात्कारत्वव्याप्यजात्यवच्छिन्नकार्यतानिरूपितकारणताश्रयत्वे सति द्रव्यत्वस्य निरुच्यमानत्वात् । यद्यप्यत्रापि ज्ञानस्य साक्षात्-

कारत्वरूपे प्रवेशोऽस्तीत्युक्तदोषः तथापि ज्ञानत्वेन रूपेण प्रवेशात् नान्योन्याश्रय इति भावः। साक्षात्कारत्वं च गुणत्वसाक्षाद्व्याप्यजातिभिन्नत्वे सतीश्वरगुणवृत्तिगुणत्वावान्तरजातिरित्यन्यदेतत्।

## स्मृतिनिरूपणम्

तत्र जन्यज्ञानजनितसंस्कारजन्यज्ञानत्वं स्मृतेर्लक्षणम्। ज्ञानत्वपदं संस्कारजन्यध्वंसेऽतिव्याप्तिवारकम्। इतरदनुभवव्यावर्तकम्। जन्यज्ञानरूपजनितेति विशेषणं वेगरूपविषयजन्यज्ञानेऽतिव्याप्तिवारकम्। यथार्थविशेषितमेतदेव यथार्थस्मृतेर्लक्षणम्। न तु सर्वं स्मृतिरूपं ज्ञानमयथार्थं; बाधकाभावात्। न च गृहीतग्राहित्वं यथार्थत्वबाधकमिति वाच्यम्। धारावाहिकज्ञानानामयथार्थत्वप्रसङ्गात्। जन्यज्ञानजनितसंस्कारत्वं जन्यत्वं प्रत्यभिज्ञायामतिव्याप्तमिति वाच्यम्। संस्कारेण जनितेन स्मरणेन प्रत्यभिज्ञोत्पत्तेः। यद्वा भावनाजन्यज्ञानत्वं स्मृतिलक्षणम्।

## अनुभवनिरूपणं, विभागश्च

जन्यज्ञानजनितसंस्कारजन्यज्ञानमनुभवः। ज्ञानपदमाकाशादिवारकम्। इतरत्स्मृतिव्यावर्तकम्। अनुभवो द्विविधः — संशयनिश्चयभेदात्।

## संशयनिरूपणम्

तत्र न संशयस्य तावदेकस्मिन् धर्मिणि विरुद्धनानार्थविमर्शत्वं लक्षणम्। 'इदं रजतमि'ति निश्चयेऽतिव्याप्तेः। न च तत्र विरुद्धनानार्थविमर्शत्वं नास्तीति वाच्यम्। तद्विषये इदंतारजतत्वयोर्विरोधात्। न च भासमानविरोधविशेषितमुक्तलक्षणमस्त्विति वाच्यम्। 'पीतत्वविरुद्धशङ्खत्वव्याप्यवानयमि'ति निश्चयेऽतिव्याप्तेः। न च धर्म्यपेक्षया भासमानविरोधधर्मप्रकारत्वं विवक्षितम्, अतो न दोष इति चेत् — न। 'पीतत्वविरुद्धशङ्खत्ववानयं पीत' इति निश्चयेऽतिव्याप्तेः।

ननु 'पीतत्वविरुद्धशङ्खत्ववानयं पीत' इति निश्चयस्य सति विशेषदर्शने जायमानत्वेन तत्राव्याप्तिवारकत्वेन विशेषादर्शनजन्यत्वेन तल्लक्षणं विशेषणीयमिति चेत् न। विशेषदर्शनं व्याप्यदर्शनम्। तदपि निश्चयरूपमेव निवर्तकमिति वक्तव्यम्। अन्यथा. 'अयं पर्वतो वह्निव्याप्यवान् न वे'ति संशयः 'पर्वतो वह्निमान् न वे'ति संशयनिवर्तकः स्यात्। तथा च व्याप्यदर्शनस्य निश्चयत्वेन निवर्तकत्वं वाच्यम्, चक्रकाश्रयात्। किं च व्याप्यदर्शनप्रामाण्यसंशयाहितसंशयस्य प्रामाण्यनिश्चयमात्रनिवर्तकत्वेन तत्राव्याप्तेः। न च संस्कारानाधायकज्ञानत्वं संशयत्वमिति वाच्यम्। प्रत्यभिज्ञायामतिव्याप्तेः। किं च संस्कारानाधायकत्वं संस्कारजनकान्य-

त्वमिति निर्वाच्यम्। तथा च तत्प्रविष्टजनकत्वं ज्ञानत्वादभेदेनाग्राह्यमतिप्रसङ्गात्। निश्चयत्वेन तद्ग्रहे चक्रकाश्रयापत्तेः।

एकस्मिन् धर्मिणि प्रतियोगितदभावविषयज्ञानत्वं संशयत्वमित्यपि न। 'मूले वृक्षः कपिसंयोगी शाखायां ने'ति निश्चयेऽतिव्याप्तेः। नाप्येकावच्छेदेन तद्विशेषणीयमिति वाच्यम्। धूमवत्पर्वते संयोगसंबन्धेन वह्निरस्ति, समवायसंबन्धेन वह्निर्नास्तीति निश्चयेऽतिव्याप्तेः; स्थाणुर्वा पुरुषो वेति संशयाव्याप्तेश्च। तत्राभावस्य विषयत्वात्। न च वाशब्दस्य भाववाचकत्वमस्त्विति वाच्यम्। स्थाणुर्वा स्थाणुत्वाभाववान् वेत्यत्र पौनरुक्त्यापत्तेः। किं च वाशब्दस्य विरोधावाचकत्वे घटत्वाभावसमानाधिकरणत्वे ज्ञायमाने पृथिवीत्वे पृथिवीत्वसमानाधिकरणत्वेनाज्ञायमाने च संशयो जातः, अयं पृथिवी वा घटो वेति तदनुपपत्तिश्च। संशयस्य सर्वस्य विरुद्ध धर्म प्रकारत्व नियमेनोक्तसंशयविषयीभूतपृथिवीत्वघटत्वयोर्वास्तवविरोधाभावात्। शब्दस्य विरोधवाचकत्वे तयोर्भासमानविरोधसंभवात् न तत्संशयानुपपत्तिरिति। एतत्पक्षे कपिसंयोगी तदत्यन्ताभाववांश्चेति निश्चयेऽतिव्याप्तेश्च। न च वृत्त्यवच्छेदकमनादाय न प्रतीतिरिति वाच्यम्। तत्तद्भूतले घटे स्तम्भा इति प्रतीतिवदुपपत्तेः।

नाप्यवधारणज्ञानं संशयः। सोऽपि संशयभिन्नज्ञानमित्यात्माश्रयापत्तेः। किं चैकस्मिन् धर्मिणीति विशेषणं समूहालम्बनातिप्रसक्तिवारकत्वेन स्वीकरणीयम्। तथा च तद्विशेषणस्यैकावच्छेदेनेत्ययमर्थो वा विवक्षितः, उत एकमात्रविशेष्यकत्वं वा। नाद्यः; पूर्वोक्तदोषानतिवृत्तेः। न द्वितीयः, समूहेऽयं वा राजा अयं वा राजेत्यनेकविशेष्यकसंशयेऽतिव्याप्तेः।

अत्रोच्यते — साक्षात्कारत्वव्याप्यत्वे सत्यव्याप्यवृत्तिधर्मौ घटेऽपि नाव्याप्यवृत्त्यनेकवृत्तिधर्मसंशयत्वम्। इदमेव संशयस्य निर्दुष्टलक्षणम्। साक्षात्कारत्वव्याप्यत्व इत्येतत्संयोगवारकम्। अव्याप्यवृत्ति ... .... पदमिन्द्रियजन्यत्वभ्रमेऽतिव्याप्तिवारकम। इदं रजतमित्यत्रेदन्ताया भिन्नभिन्नत्वेन तद्विशिष्टपदार्थविशेष्यकरजतत्वप्रकारकज्ञानत्वे एकव्यक्तिवर्तिन्यतिव्याप्तिवारकमनेकवृत्तिपदम्।

यद्वा प्रमात्वव्यापकाव्याप्यवृत्तिधर्मवत्त्वं निश्चयस्य लक्षणम्। न च प्रमात्वव्यापकाव्याप्यवृत्तिधर्मे निश्चयस्य ... ... तत्सत्त्वे न मानमस्तीति वाच्यम्। निश्चिनोमीत्यनुव्यवसायस्य निश्चयत्वे मानत्वात्। प्रमात्वव्यापकपदमव्याप्यवृत्तिसंयोगवति घटादावतिव्याप्तिवारकम्। अव्याप्यवृत्तिपदं प्रमात्वव्यापकज्ञानत्ववति संशयेऽतिव्याप्तिवारकम्। तथा च निश्चयभिन्नज्ञानत्वं संशयस्य लक्षणम्।

Indira Gandhi National Centre for the Arts

## निश्चयनिरूपणं, तद्विभागश्च

प्रमात्वव्यापकाव्याप्यवर्तिधर्मवत्त्वं निश्चयस्य लक्षणम् । निश्चयश्चतुर्विधः — साक्षात्कारानुमित्युपमितिशाब्दभेदात् ।

## साक्षात्कारनिरूपणम्, विभागश्च

तत्र स्मृत्यन्यत्वे सतीश्वरसमवेतसमवेतत्वरहितानुभवत्वसाक्षाद्व्याप्यजात्याश्रयान्यज्ञानत्वं साक्षात्कारस्वरूपलक्षणम् । जातिलक्षणं तु साक्षात्कारत्वमेव । तदपीश्वरसमवेतसमवेतत्वरहितेति विशेषणमभाववारकम् । साक्षात्पदं चक्षुर्जन्यज्ञानसाक्षात्कारेऽव्याप्तिवारकम् । अन्यपदमनुमित्यादिवारकम् । ज्ञानपदं घटेऽतिव्याप्तिवारकम् । लक्षणद्वयमीश्वरसाक्षात्कारसाधारणम्; अतो नाव्याप्तिरिति संशयान्यत्वविशेषितमिदमेव निर्णयरूपसाक्षात्कारलक्षणम् । निर्णयरूपसाक्षात्कारो द्विविधः – साक्षात्कारिप्रमाप्रमाभेदात् ।

## प्रमानिरूपणम्

तत्र तावत् प्रमालक्षणं सामान्यं चिन्त्यते — न तावदिन्द्रियजन्यज्ञानत्वं प्रमात्वम्; इन्द्रियजन्यभ्रमेऽतिव्याप्तेः ।

नापि विशेष्यावृत्त्यप्रकारकज्ञानवत्त्वम्; आकाशे शब्द इति प्रमायामव्याप्तेः, शब्दआकाश इति भ्रमेऽतिव्याप्तेश्च ।

नापि तद्वति तत्प्रकारकज्ञानत्वम्; पूर्वोक्तदोषानतिवृत्तेः ।

अबाधितानुभवत्वं प्रमात्वमित्यपि न । बाधस्य विपरीतप्रमारूपत्वेनान्योन्याश्रयात् ।

नापि विषयत्वं [विषयित्वम्]; भ्रमसाधारणत्वात् ।

नापि समर्थप्रवृत्तिजनकत्वम्; उपेक्षाबुद्ध्यव्याप्तेः ।

नापि विशेष्यनिष्ठात्यन्ताभावाप्रतियोगिधर्मप्रकारकानुभवत्वम्, संयोगिप्रमायामव्याप्तेः । न च व्याप्यवृत्तीति विशेषणमस्तीति वाच्यम्, संयोगिभ्रमेऽतिव्याप्तेः ।

नापि स्वव्यधिकरणप्रकारानवच्छिन्नविषयता प्रतियोग्यनुभवः, प्रमा प्रमेयमिति प्रमेयत्वप्रकारकज्ञानविषयताव्यधिकरणप्रकाराप्रसिद्धेः शब्दे आकाश इति भ्रमेऽतिव्याप्तेश्च ।

यत्र यदस्ति तत्र तदवगाहिज्ञानं प्रमेत्यपि न, रक्तघटे श्यामत्वभ्रमेऽतिव्याप्तेः । तत्र पूर्वं श्यामरूपस्य सत्त्वेनोक्तलक्षणानुपपत्तेः ।

न च यत्र ज्ञानकालीनं यदस्ति तत्र तदवगाहिज्ञानं प्रमेति वाच्यम्, 'वृष्टिमानासीत्' 'वृष्टिमान् भवती'ति प्रमायामव्याप्तेः ।

ननु यदवच्छेदेन यत्र यदस्ति तत्र तदवच्छेदेन तदवगाहिज्ञानं प्रमा । तथा च 'वृष्टिमानासीत्' 'वृष्टिमान् भविष्यती'त्यत्र नाव्याप्तिः । अतीतकालावच्छेदेन भविष्यत्कालावच्छेदेन वृष्टिः [वृष्टेः] प्रतीयमानत्वात् । रक्तघटे श्यामत्वभ्रमे नातिव्याप्तिरपि । रक्तघटे श्यामो घट इत्येवमाकारज्ञानं प्रमा, पूर्वं तत्र श्यामरूपस्य सत्त्वात् । इदानीं श्याम इत्येवा ... ... तत्र लक्षणं न गतमिति नाव्याप्तिशङ्केति चेत् — न । घटे इति प्रमायामव्याप्तेः । तत्रावच्छेदकस्यास्फुरणात् । न च यदवच्छेदेन यत्र यदस्ति तत्र तद्विरुद्धानवच्छेदेन तत्र तदवगाहिज्ञानं विवक्षितम् । तथा चावच्छेदकास्फुरणप्रयुक्तदोषो नास्तीति वाच्यम् । प्रमेयमित्यत्राव्याप्तेः । तत्रावच्छेदकविरुद्धस्याप्रसिद्धेः ।

न च प्रमेयत्वावच्छेदकमभिधेयत्वम्, तद्विरुद्धमाकाशं प्रसिद्धमिति वाच्यम् । प्रमेयत्वावच्छेदकत्वस्याभिधेयत्वादेः वक्तुमशक्यत्वात् । तथा हि—तदनधिकरणवृत्तित्वे सति तदधिकरणवृत्तित्वमवच्छेदकं वाच्यम् । प्रकृते प्रमेयत्वानधिकरणस्याप्रसिद्धेरभिधेयत्वस्यावच्छेदकत्वं न वक्तुं शक्यम् । न च तदवच्छेदकत्वं तद्भिन्ननिष्ठात्यन्ताभावाप्रतियोगित्वमिति वाच्यम् । घटजनकतावच्छेदकदण्डत्वेऽव्याप्तेः ।

Indira Gandhi National
Centre for the Arts

ननु यद्भिन्ननिष्ठात्यन्ताभावप्रतियोगि यत् तादृशाभावप्रतियोगिनं प्रति तदनवच्छेदकम् । तथा चाभिधेयत्वदण्डत्वयोर्नाव्याप्तिरिति चेत् — 'मूले वृक्षः कपिसंयोगी शाखायां ने'त्यत्र मूलादेरवच्छेदकत्वाभावप्रसङ्गात् । न च व्याप्यवृत्त्यत्यन्ताभावविशेषणमिति वाच्यम् । सत्त्वस्य सत्त्ववन्निष्ठाव्याप्यवृत्त्यत्यन्ताभावाप्रतियोगिसंयोगावच्छेदकत्वापातात् ।

**अत्रोच्यते** — यदवच्छेदेन यत्र यदस्ति तदन्यावच्छेदेन तत्र तदवगाहिज्ञानं प्रमा । नन्वत्रापि लक्षणेऽवच्छेदकप्रवेशात् पूर्वोक्तदोषस्तदवस्थ एवेति चेत् — न यदधिकरणे यावति यस्य वृत्तिरस्ति तस्य वृत्तिमतोऽवच्छेदकमित्यवच्छेदकनिर्वचनादिति ।

इन्द्रियत्वेनेन्द्रियाजन्यजन्यज्ञानान्यप्रमात्वं साक्षात्कारिप्रमालक्षणम् । तत्र प्रमात्वपदं भ्रमवारकम् । इतरदनुमित्यतिव्याप्तिवारकम् । इन्द्रियत्वेनेति विशेषणमसम्भववारकम् । जन्यपदमीश्वरसाक्षात्कारेऽतिव्याप्तिवारकम् ।

प्रमाभिन्नत्वे सतीन्द्रियत्वेनेन्द्रियजन्यज्ञानत्वं साक्षात्कारिभ्रमलक्षणम् ।

## इन्द्रियत्वविचारः

नन्विन्द्रियत्वेनेत्यादिना इन्द्रियस्य जनकत्वमुक्तमयुक्तम्, इन्द्रियत्वस्य निर्वक्तुमशक्यत्वात्। तथा हि—न तावत् शरीरसंयुक्तं ज्ञानकारणमतीन्द्रियमिन्द्रियम्, वायोः स्पर्शज्ञाने वायोः सन्निकर्षत्वेन जनकत्वेन तत्रोक्तलक्षणसत्त्वेनातिव्याप्तेः। न च सन्निकर्षत्वेनाजनकत्वे सतीत्यनेन तल्लक्षणं विशेषणीयमिति वाच्यम्। 'भूतले घटो नास्ती'त्यत्र चक्षुर्घटाभावयोः स्वरूपसन्निकर्षातिरिक्तसन्निकर्षस्य वक्तुमशक्यत्वेन इन्द्रियस्य सन्निकर्षत्वेनापि जनकत्वेन तत्राव्याप्तेः। अतीन्द्रियत्वमिन्द्रियायोग्यत्वमित्यात्माश्रयदोषाच्च।

नापि स्मृत्यजनकज्ञानकारणमनस्संयोगाश्रयत्वम्। मनसाऽऽत्मसाक्षात्कारे जनयितव्ये संयोगसंबन्धेनात्मनो ग्राह्यत्वेनात्मन्युक्तलक्षणयोगादतिव्याप्तेः। न च स्मृतिजननायोग्यत्वं विवक्षितम्। आत्मनिष्ठसाक्षात्कारे जनकीभूतसंयोगस्य स्मृतिजननयोग्यत्वेन नोक्तलक्षणमिति वाच्यम्। तादृशसंयोगजातीयेन कदापि स्मरणाजननात्। न च जननस्मृतिजननायोग्यत्वं स्मृतिजनकतावच्छेदकावच्छिन्नत्वमवच्छेदकं चात्र मनस्संयोगत्वमेव, तच्चात्ममनस्संयोगेऽस्तीति वाच्यम्। चक्षुर्मनस्संयोगस्याप्युक्तावच्छेदकत्वेनासम्भवापत्तेः। स्मृतिजननयोग्यत्वं स्मृतिजनकतावच्छेदकावच्छिन्नत्वम्। अत्र चक्षुर्मनस्संयोगत्वमनवच्छेदकत्वम्, तद्वदुद्बुद्धसंस्काराकालीनात्ममनस्संयोगत्वमनवच्छेदकत्वमिति तुल्यम्।

किं च स्मृत्यजनकज्ञानकारणमनस्संयोगाश्रयत्वमित्यत्र मनस्संयोगस्य ज्ञानकारणत्वं किमवच्छेदकेन ग्राह्यम्। न तावत् संयोगत्वेन, अतिप्रसङ्गात्। नापि मनस्संयोगत्वेन, आकाशमनस्संयोगेऽतिप्रसक्तेः। नापि चक्षुर्मनस्संयोगत्वेन, अननुगमात्। न च बाह्येन्द्रियमनस्संयोगत्वमनवच्छेदकं, अतो नोक्तदोष इति वाच्यम्। अन्योन्याश्रयात्, आत्मसाक्षात्कारजनकीभूतसंयोगेऽव्याप्तेश्च। किं च स्मृत्यजनकज्ञानकारणमनस्संयोगस्मृतिजनकमनस्संयोगयोर्मनसि वाऽऽत्मन्यविरहत्वेन तत्रातिव्याप्तिर्वज्रलेपायते। अन्यथा आत्ममनस्संयोगजन्यात्मज्ञाने साक्षात्कारत्वं न स्यात्। किं चात्मा मनसा संयुज्यत इति प्रक्रियया आत्ममनस्संयोगस्य बहिरर्थसाक्षात्कारे जनकत्वसंभवादतिव्याप्तिर्दृढा।

**एतेन** शब्देतरोद्भूतगुणानाश्रयत्वे सति ज्ञानकारणमनस्संयोगाश्रयत्वमिन्द्रियत्वमित्यपि **निरस्तम्**। शुक्लत्वादिव्याप्यमनुद्भूतत्वमेव जातिः, किं तु रूपत्वव्याप्यजातिमत्त्वमिति पक्षे विशेषपदवैयर्थ्यात्। उद्भूतत्वं सामान्यगुणावृत्तिजातिविशेषसंप्रदायपक्षेऽपि एवं दूषणम्, तच्चोद्भूतत्वं प्रत्यक्षयोग्यतापादकधर्मविशेष इति वाच्यम्। चक्रकाश्रयापत्तेः, विशेषपदवैयर्थ्याच्च।

**अत्रोच्यते** – साक्षात्कारत्वव्याप्यजात्यवच्छिन्नकार्यताप्रतियोगिककारणताश्रयत्वे सति द्रव्यत्वमिन्द्रियस्य लक्षणम् । आद्यविशेषणमात्मादिनिवर्तकम् । द्वितीयं चक्षुर्घटसंयोगेऽतिव्याप्तिवारकम् । एवं तल्लक्षणाविष्टकारणताग्रहः चक्षुषा सुकर इत्यननुगमदोषः प्रागुक्त इति चेत् – न । अननुगतदण्डत्वेन घटकारणताग्रह इव तदुपपत्तेः ।

## इन्द्रियविभागः

तच्चेन्द्रियं षड्विधम्—घ्राण-रसना-चक्षुः-श्रोत्र-त्वङ्-मनोभेदात् ।

## घ्राणनिरूपणम्

गन्धज्ञानजनक ... ... तीन्द्रियगन्धवत्वं घ्राणस्य लक्षणम् । अत्राद्यपदं परमाणुवारकम् । द्वितीयादिपदमीश्वरवारकम् । अतीन्द्रियपदं सन्निकर्षत्वेन गन्धज्ञानजनकगन्धवारकम् । न च गन्धोपलब्धिसाधनमिन्द्रियं घ्राणमिति वाच्यम् । इन्द्रिये सर्वोपलब्धिसाधने ... ... स्यातिव्याप्तेः ।

## रसननिरूपणम्

रसज्ञानजनकत्वे सत्यतीन्द्रियरसवत्वं रसनस्य लक्षणम् । पदप्रयोजनं पूर्ववत् ।

## चक्षुर्निरूपणम्

रूपज्ञानसाधारणत्वे सतीन्द्रियरूपवत्वं चक्षुर्लक्षणम् । व्यावृत्यर्थं पूर्ववत् ।

## श्रोत्रनिरूपणम्

शब्दज्ञानजनकत्वे सति शब्दवत्वं श्रोत्रलक्षणम । आद्यपदमाकाशवारकम् । इतरच्छब्दवारकम् ।

## त्वङ्निरूपणम्

स्पर्शज्ञानजनकत्वे सत्यतीन्द्रियस्पर्शवत्वं त्वग्लक्षणम् ।

## मनोनिरूपणम्

ज्ञानासमवायिकारणाश्रयत्वे सत्यणुत्वं मनसो लक्षणम् । आद्यपदं पृथिवीपरमाणुवारकम् । अणुत्वपदमात्मवारकम् ।

इति श्रीमत्तिप्पभट्टकृतलक्षणराजौ साक्षात्कार (प्रत्यक्ष) निरूपणं समाप्तम् ॥

## अनुमितिनिरूपणम्

साक्षात्त्वं सप्रपञ्चं निरूप्यानुमितेर्लक्षणमुच्यते — पक्षतात्वेन पक्षताजन्यत्वमनुमिति स्वरूपलक्षणम् । जातिलक्षणं त्वनुमितित्वमेव । व्याप्य[निश्चय]त्वेन व्याप्यनिश्चयजन्यत्वं वाऽनुमिति लक्षणम् ।

## तद्भेदनिरूपणम्

भ्रमप्रमाभेदेनानुमितिः द्विधा । तत्र व्यापकवदन्योन्याभाव[वद्वृत्तिप्रकृत]व्यापकविषयत्वानुमितित्वं हेत्वभावजन्या[नुमि]तित्वं भ्रमानुमितेर्लक्षणम् । अत्र पदप्रयोजनं बुद्धिमता ऊहनीयम् । प्रमानुमितेर्लक्षणं तु भ्रमान्यानुमितित्वम् । भ्रमत्वं च पूर्वमेव निरुक्तमिति ।

## मतान्तरं तत्खण्डनं च

**यत्तु** — पक्षव्याप्त(?)विशिष्टपक्षधर्मताज्ञानजन्यज्ञानमनुमितिरिति — तदसत्; तथाहि — वस्तुगत्या व्याप्तिविशिष्टपक्षधर्मताज्ञान[रूपपरामर्श]जन्यत्वं वा, तत्त्वेन तज्जन्यत्वं वा । नाद्यः; व्याप्तिविशिष्टपक्षधर्मताज्ञानानुव्यवसा[येऽतिव्याप्त्या]पत्तेः । नापरः, संशयोत्तरप्रत्यक्षेऽतिव्याप्तेः । पक्षधर्मताज्ञानत्वेन पक्षधर्मताज्ञानत्वस्यैव लक्षणत्वे? व्याप्तिविशिष्टेतिपदवैयर्थ्यम् ।

एतेन व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकजातिमत्वमनुमितिलक्षणमित्यपि **परास्तम्** । केवलव्यतिरेक्यनुमितौ व्यतिरेकव्याप्तेरेव गमकत्वमिति व्यतिरेक्यनुमितिजनकपक्षधर्मताज्ञानवृत्तिकारणताया व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वावच्छिन्नत्वाभावेन केवलव्यतिरेक्यतिरेक्यनुमिति सम्भवापत्तेश्च ।

पक्षतापरामर्शोभयजन्यत्वं नानुमितेर्लक्षणम् । बाधसत्प्रतिपक्षस्थले पक्षतापरामर्शोभयजन्यसमूहालम्बनेऽतिव्याप्तेः, व्याप्तिविशिष्टेतिपदवैयर्थ्याच्च । न च व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानवृत्तिज्ञानत्वापरजातिमत्वे सति पक्षताजन्यत्वमनुमितिलक्षणमिति वाच्यम् । साक्षात्कारत्वरूपज्ञानत्वापरजातित्वं ... समूहालम्बनेऽतिव्याप्तेः ।

सा चानुमितिर्द्विविधा — स्वार्था परार्था चेति भेदात् । तत्र न्यायवाक्याननुविधाय्यनुमितित्वं स्वार्थानुमितेर्लक्षणम् । न्यायवाक्यानुविधाय्यनुमितित्वं परार्थानुमितेर्लक्षणम् ।

## न्यायनिरूपणम्

ननु न्यायवाक्यगर्भत्वेन लक्षणमुक्तम् — तदयुक्तम् — न्यायवाक्यस्य निर्वक्तुमशक्यत्वात् । तथा हि — न तावद्धेतुप्रतिपादकवचनत्वम्; 'वह्निव्याप्यधूमवानयमि'ति वाक्येऽतिव्याप्तेः । नापि दोषोत्पन्नत्वेन हेतुप्रतिपादकवचनत्वम्; 'वह्निव्याप्यधूमवानयमि'त्युपनये-

ऽतिव्याप्तेः । पञ्चरूपोपपन्नत्वेन हेतुप्रतिपादकवचनत्वं न, च ... ... केवलव्यतिरेकिहेतुप्रतिपादकन्यायवाक्येऽव्याप्तेः । न च यस्य हेतो रूपं त्रिरूपाणि सन्ति तावद्रूपोत्पन्नतद्धेतुप्रतिपादकवचनं न्याय इति वाच्यम्; आप्तवाक्येष्वतिव्याप्तेः । अनुमितिचरमकारणलिङ्गपरामर्शयोजकशब्दज्ञानजनक इति वाच्यम्। न्याय इत्येतदसमञ्जसम्। शाब्दज्ञानजनकज्ञानत्वस्यानवच्छेदकग्रहाधीनतया तदवच्छेदकस्य वक्तुमशक्यत्वात्। शब्दत्वे वा तदेव लक्षणमस्तु आवश्यकत्वात्।

किं च परामर्शस्यानुमिति चरमकारणत्वमस्य शक्यं निर्वचनम् । न चानुमितौ कर्तव्या ... ... स्युत्तरभाविज्ञानानपेक्षत्वं चरमत्वमिति वाच्यम्; विकल्पासहत्वात्। तथा हि— स्वोत्पत्त्युत्तरभाविज्ञानानपेक्षत्वमित्यत्र यत्किञ्चिज्ज्ञानानपेक्षत्वं वाऽनुमितिकरणज्ञानानपेक्षत्वं वा। नाद्यः; व्याप्तिज्ञानसाधारणे कारणत्वात्। न द्वितीयः; सिद्ध्यसिद्धिभ्यां व्याघातात्। किं च परामर्शपदं शाब्दपदं चाधिकम्। न च शाब्दपदम्; नायमाभासः, तल्लक्षणायोगादिति न्यायभिन्नकण्टकोद्धारवाक्येऽतिव्याप्तिवारकमिति वाच्यम् । एतद्वाक्यजन्यस्य परामर्शप्रयोजकव्याप्तिज्ञानजनकयोग्यताज्ञानस्याशब्दत्वेनातिव्याप्तितादवस्थ्यात्। न च योग्यताज्ञानत्वेन योग्यताज्ञानस्य परामर्शप्रयोजकत्वम्, न्यायजन्यज्ञानत्वस्य तु शाब्दत्वेन प्रयोजकत्वमतो नोक्तदोष इति वाच्यम्। शाब्दत्वस्यातिप्रसक्ततया परामर्शप्रयोजकतानवच्छेदकत्वात्। न च न्यायजन्यशाब्दत्वमवच्छेदकमिति वाच्यम्; अन्योन्याश्रयात्।

**अत्रोच्यते**—परस्यानुमितिः स्यादिति भयोच्चारितत्वे सति हेतुताप्रतिपादके विभक्तिमच्छब्दघटे सम्भाविताशेषरूपोत्पन्नलिङ्गप्रतिपादकवचनत्वं न्यायवाक्यत्वम् । अत्राद्यविशेषणमुदासीनबुद्धिव्यावृत्त्यर्थम्। न्यायत्वं चात्रयववाक्यत्वमुक्तं तत्रातिव्याप्तिवारकम्। हेतुताप्रतिपादकविभक्तिमच्छब्दघटे ... पदं धूमः पञ्चरूपोत्पन्न इति केनचित् भ्रान्तेन परानुमितिभयोच्चारितं यद्वाक्यं तत्रातिव्याप्तिवारकम्। सम्भाविताशेषपदं गतिपदावयवात्मकेऽतिव्याप्तिवारकम्।

यद्वा सम्भाविताशेषरूपपदप्रतिपादकत्वे सति आनुपूर्वीविशिष्टत्वे सति परानुमितिभयोच्चारितवाक्यत्वं न्यायवाक्यत्वम्। तत्र प्राथमिकविशेषणमुपनयनिगमनाघटितप्रतिज्ञाद्युदाहरणान्तवाक्येऽतिव्याप्तिवारकम्। आनुपूर्वीत्यादि निगमनादिप्रतिज्ञान्तवाक्येऽतिव्याप्तिवारकम्। आत्यन्तिकपदमौदासीन्येन वाऽऽवृत्त्यर्थं वा यदुक्तं वाक्यं तत्रातिव्याप्तिवारकम्।

## अवयवनिरूपणम्

न्यायवाक्यलक्षणमुक्त्वा अधुना तदवयवाः प्रतिज्ञादयो निरूप्यन्ते। तत्र ताव'न्न्यायवाक्यजन्यशाब्दज्ञानजनकशाब्दज्ञानजनकवाक्यत्वमवयवत्वमि'ति **मणिकारोक्तम**युक्तम्। जन्य-

तावच्छेदकजनकतावच्छेदकयोरग्रहे जन्यत्वजनकत्वयोरग्रहात् शाब्दत्ववाक्यत्वयोर्न जन्यत्व-जनकत्वावच्छेदकत्वे, अतिप्रसक्तत्वात् । तयोरस्य दुर्वचत्वात् । किन्तु साक्षान्न्यायवाक्यावान्तर-वाक्यत्वयोरवयवत्वम् । साक्षान्न्यायवाक्यावान्तरवाक्यत्वं नाम तद्घटैकत्वविशेषः । सोऽपि न्यायवाक्यावान्तरवाक्यघटैकत्वे सति न्यायवाक्यघटैकत्वमित्यन्यदेतत् ।

## अवयवविभागः

प्रतिज्ञाहेतूदाहरणोपनयनिगमनभेदात् ।

## प्रतिज्ञानिरूपणम्

तत्र परस्यानुमिति[प्रतिपिपादयिषया तद्धे]त्वाकाङ्क्षापूर्वं पक्षस्य साध्यसंबन्धित्वमात्र-प्रतिपादकवाक्यत्वं प्रतिज्ञात्वम् । अत्र मात्रपदं न्यायवाक्येऽतिव्याप्तिवारकम् । परस्येत्यादि-विशेषणमुदासीनवाक्येऽतिव्याप्तिवारकम्, आवृत्त्यर्थमुक्तवाक्यवारकं वा । तद्धेत्वित्यादिविशेषणं निगमनादिवारकम् ।

**यत्तु मणिकृतोक्तं** — उद्देश्यानुमितिहेतुलिङ्गपरामर्शप्रयोजकवाक्यार्थज्ञानजनकत्वे सत्युद्देश्यानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकवाक्यत्वं प्रतिज्ञात्वमिति लक्षणादि प्रतिज्ञा-लक्षणचतुष्टयं तु दुष्टम् । तस्य जनकत्वगर्भत्वेन जनकतावच्छेदकस्य वक्तुमशक्यत्वात् । वाक्यत्वस्यातिप्रसक्त्याऽनवच्छेदकत्वादिति ।

## हेतुनिरूपणम्

प्रतिज्ञानन्तरोद्दिष्टहेतुलक्षणं तु ... ... साध्यप्रतिपादकपद ... घटितलिङ्गप्रतिपादक-शब्दत्वमेव; न तु **मणिकारोक्त**मनुमितिकरणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानकरणसाध्याविषयक-शाब्दधीजनकहेतुविभक्तिमच्छब्दत्वं हेतुलक्षणम् । तस्यापि जनकत्वगर्भत्वेन पूर्वोक्तदोषानतिवृत्तेः । परेत्यादिकमुदासीनवाक्यवारकम् । साध्येत्यादिकमितरावयवचतुष्टयवारकम् ।

## उदाहरणनिरूपणम्

उदाहरणलक्षणमुपनयाव्यवहितपूर्वसमयोच्चारितन्यायावयवत्वम् । अव्यवहितपदं प्रतिज्ञा-वारकम् । न्यायेत्यादिकमुदाहरणैकदेशवारकम् । उपनयसमयपद[द्वय]मुपनयवारकम् ।

## मतान्तरं, तत्खण्डनं च

**यत्तु** — अनुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञानजनकव्याप्यत्वाभिमतनिष्ठनियत-व्यापकत्वाभिमतसम्बन्धबोधजनकवाक्यत्वमुदाहरणमिति — **तन्न** — एतल्लक्षणस्यापि जनकत्वगर्भत्वेन जनकतावच्छेदकस्य वक्तुमशक्यत्वात् ।

## उपनयनिरूपणम्

परानुमितिभयोच्चरितयावत्परामर्शविषयमात्रप्रतिपादकवाक्यत्वमुपनयलक्षणम् । यद्वा निगमनकालाव्यवहितपूर्वकालोच्चरितन्यायावयवत्वमुपनयत्वम् ।

## मतान्तरं, तत्खण्डनं च

यश्चानुमितिहेतुतायां तृतीयलिङ्गपरामर्शजनकावयवमुपनय इति-तन्मन्दम्-एतस्य जनकत्वगर्भत्वेनोक्तदोषानतिवृत्तेः । किं च तृतीयपदमप्यधिकम् ।

एतेन मणिकारोक्तजनकत्वघटितनिगमनलक्षणमपास्तम् ।

## निगमननिरूपणम्

हेत्वभिधानोत्तरकाले परानुमितिभयोच्चरितत्वे सति पक्षस्य साध्यासाध्यसम्बन्धित्वमात्रप्रतिपादकवाक्यत्वं निगमनस्य लक्षणम् । प्रथमं प्रतिज्ञावारकम् । इतरपदप्रयोजनं बुद्धिमतोह्यम् ।

न तु निगमनस्य वाक्यघटितत्वेन वाक्यस्याकांक्षाघटितत्वेनाकांक्षा निरूपयितुमशक्या । तथा हि — न तावत्समभिव्याहृतपदार्थजिज्ञासाकाङ्क्षावाक्यश्रवणोत्तरक्षणे जिज्ञासां विना वाक्यार्थप्रतीतेः सर्वजनसिद्धत्वात्, एतादृशाकाङ्क्षाज्ञानं विना शाब्दबोधदर्शनाच्च ।

अथ श्रोतरि तदुच्चारणजन्यसंसर्गावगमप्रागभावसाकाङ्क्षेति चेत् — न । ज्ञानाकाङ्क्षायाः का ... कोऽन्वयत्वेन कार्यात्पूर्वं ज्ञातुमशक्यत्वात् । ननु यस्य पदस्य येन पदेन विना स्वतात्पर्यविषयान्वयानुभावकत्वं नास्ति तस्य तदपर्यवसानमाकाङ्क्षेति चेत् — न । तात्पर्यविषयान्वयस्याकाङ्क्षाघटकस्य वाक्यात्पूर्वं ज्ञातुमशक्यत्वात् । एतदज्ञानेऽपि वाक्यार्थप्रतीतेर्लोकसिद्धत्वादिति चेत् — न । यच्छ्रवणानन्तरमर्थज्ञानजनने सत्यर्थे विशेषजिज्ञासानिवृत्तिर्वा प्रवृत्तिर्वा सम्भवति तत्त्वमाकाङ्क्षात्वम् । न च धर्मशून्यप्रकृतसंसर्गबाधकप्रमाणाभावः; सिद्ध्यसिद्धिभ्यां व्याघातात् ।

नाप्येकपदार्थनिष्ठसंसर्गेऽपरपदार्थनिष्ठप्रतियोगिव्यधिकरणात्यन्ताभावप्रतियोगितावच्छेदकपदार्थप्रतिपादकत्वं योग्यता । प्रतियोगिव्यधिकरणेति विशेषणं 'इदं संयोगिद्रव्यत्वात्' इत्यत्राव्याप्तिवारकमिति वाच्यम् । 'इदं संयोगि सत्त्वात्' इत्ययोग्येऽतिव्याप्तेरिति चेत् — न । प्रतीयमानसम्बन्धसमानाधिकरणपदार्थतावच्छेदकपदार्थप्रतिपादकत्वं योग्यता । यद्वा यत्पदार्थानुयोग्यार्थः पदार्थतावच्छेदकसमानाधिकरणस्तत्त्वं योग्यतेति सङ्क्षेपः ।

## पक्षतानिरूपणम्

ननु पक्षतात्वेन पक्षताजन्यत्वमनुमितिलक्षणमुक्तम् — तदयुक्तम् — पक्षताया निर्वक्तुमशक्यत्वात् । तथाहि — न तावत्सन्दिग्धसाध्यधर्मत्वं पक्षता ; निश्चितवह्नौ महानसेऽनुमित्सायामनुमित्यभावप्रसङ्गात् । नाप्यनुमित्सा पक्षता, अनुमित्साविरहदशायां सन्दिग्धसाध्ये पर्वते पक्षताऽभावप्रसङ्गात् । सिसाधयिषाविरहसहकृतसिध्यभावः पक्षता । तथा चायं विशिष्टाभावः सन्दिग्धसाध्ये पर्वते विशेष्यभूतसिध्यभावः प्रयुक्तः सम्भवति । महानसविशेषणाभावप्रयुक्त इति चेत् — न, विकल्पासहत्वात् । सिसाधयिषाविरहसहकृतेत्यत्र विरहः किं वक्ष्यते? प्रागभावो वा प्रध्वंसाभावो वा अत्यन्ताभावो वा अन्योन्याभावो वा ।

नाद्यः — कालान्तरे उत्पद्यमानसिसाधयिषाप्रागभावविशिष्टसिद्धेः सत्त्वेन पुरुषस्येदानीमुत्पन्नायां सिसाधयिषायामनुमित्यभावप्रसङ्गात् । न च विशिष्टसत्त्वे विशिष्टाभावसत्त्वमङ्गीकृतमिति वाच्यम् । इदानीमुत्पन्नसिसाधयिषाप्रागभावविशिष्टसिध्यभावस्य कालान्तरेऽपि सत्त्वेन सिद्धिमतः सिसाधयिषाविरहमतः पुरुषस्यानुमितिप्रसङ्गात् ।

न द्वितीयः — सिसाधयिषाप्रागभावदशायां प्रध्वंसविशिष्टसिद्ध्यसिद्ध्यभावरूपविशिष्टाभावसत्त्वेन सिद्धिमतोऽनुमितिप्रसङ्गात् । इदानीमुत्पन्ना सिसाधयिषा तद्ध्वंसस्य कालान्तरेऽपि सत्त्वेन ध्वंसविशिष्टसिद्धसत्त्वेन कालान्तरेऽनुमित्सायामनुमित्यभावप्रसङ्गात् ।

न तृतीयः — यत्रोत्पत्स्यतेऽनुमित्सा तत्र सिसाधयिषात्यन्ताभावविशिष्टसिद्धेरसिद्धेः सिद्धिमतोऽनुमित्साविरहेऽनुमितिप्रसङ्गात् । यज्ञदत्तसिसाधयिषाभावविशिष्टसिद्धिमतो देवदत्तस्य सिसाधयिषायामनुमित्यभावप्रसङ्गाच्च ।

न चतुर्थः — सिसाधयिषाऽन्योन्याभावस्य सदातनत्वेन तादृशान्योन्याभावविशिष्टसिद्धिमतः पुंसः सिसाधयिषायामनुमित्यभावप्रसङ्गात् ।

न च सिसाधयिषाविरहपदं संसर्गाभावपरमिति वाच्यम् । अन्यदीयसिसाधयिषाप्रागभावविशिष्टसिद्ध्यभावस्यान्यस्य सत्त्वेन तस्य सिद्धिमतः सिसाधयिषाविरहदशायामनुमितिप्रसङ्गात् । यत्किञ्चित्संसर्गाभावविशिष्टसिद्धेः सत्त्वेन सिद्धिमतः सिसाधयिषायामनुमित्यभावप्रसङ्गाच्च । न च सिद्धिमतः सिसाधयिषान्या उत्पद्यत इति वाच्यम् । सिसाधयिषापदस्यानुमित्सापरत्वात् ।

नन्वन्यदीयसिसाधयिषाविरहमादायानुमित्साविरहदशायां विशिष्टाभावसत्त्वेनान्योन्यानुमितिप्रसङ्गवारणार्थं स्वसमानाधिकरणपदम् । यत्किञ्चित्संसर्गाभावमादाय विशिष्टसत्त्वेन सिद्धि-

मतोऽनुमित्सायामनुमित्यभावप्रसङ्गवारणार्थं यावत्पदं च संसर्गाभावविशेषणं देयमिति चेत्—न; संसर्गपदवैयर्थ्यात्।

किं च स्वसमनाधिकरणयावत्सिसाधयिषासंसर्गाभावसहकृतत्वं सिद्धेर्विशेषणम्। तच्च कीदृशं विवक्षितं, यावत्संसर्गाभावाधिकरणत्वं वा यावत्संसर्गाभावैस्सह विद्यमानत्वं वा। नाद्यः, एतद्विशेषणविशिष्टसिद्धेरेव सत्त्वेन सिद्धिमतोऽनुमित्सायामनुमित्यभावप्रसङ्गात्। न द्वितीयः; इह जन्मन्युत्पन्नसिद्धेः पूर्वजन्मन्युत्पन्नसिसाधयिषाप्रागभावसाहित्याभावेन विशिष्टाभावसिद्धेः सिद्धिमतः सिसाधयिषानुत्पत्तावनुमितिप्रसङ्गात्।

न च स्वसमानकालीनेत्येतदपि संसर्गाभावविशेषणम्, अतो नोक्तदोष इति वाच्यम्। उत्पत्स्यमानानुमिति रूपसिद्धिसमानकालीनसंसर्गाभावसहकृतोत्पन्नसिद्धितदभावसिद्धिमतोऽनुमित्सायामनुमित्यभावप्रसङ्गात्। न चोत्पन्नसिद्धिपरं स्वशब्द इति वाच्यम्। लिङ्गोपहतलैङ्गिकभानपक्षे विशिष्टाभावस्य सत्त्वेनानुमित्यनन्तरमनुमितिप्रसङ्गात्।

किं च सिद्ध्यभाववति यस्मिन् सिसाधयिषा नोत्पन्ना तत्र सिध्यभाववति पराज्ञातवस्तुनि सिसाधयिषाया अप्रसिद्धत्वात्, तद्विरहसहकृतसिध्यभावोऽप्यप्रसिद्धः। न च सिसाधयिषा हि साध्यसिद्धीच्छा, सा चेश्वरेच्छा भवत्येवेति नात्राप्रसिद्धिरिति वाच्यम्। अनुमित्याभाव्यमित्याकारिकायाः सिसाधयिषायाः पक्षतांघटकत्वेनानुमितिरहितेश्वरेच्छायाः परेस्यानुमितिर्भूयादित्येतादृशकालिकायाः पक्षत्वाघटकत्वात्।

अपि च सिसाधयिषाविरहसहकृतसाध्यसिद्धिः प्रतिबन्धिकेति वाच्यम्। तथा च तादृशी सिद्धिः कीदृशी विवक्षिता। न तावत् वह्निनिश्चयमात्रं वह्न्यनुमितौ प्रतिबन्धकम्; अन्यस्य पर्वतादौ वह्निनिश्चयेऽन्यस्यानुमित्यभावप्रसङ्गात्। यस्य यत्र यत्साध्यानुमितिः तस्य तत्र तत्साध्यानुमितौ प्रतिबन्धक इत्यपि न, सामान्यलक्षणाप्रत्यासत्या धूमवृत्तिपर्वते वह्निनिश्चयसम्भवात् अनुमित्यभावप्रसङ्गात् तत्पक्षतावच्छेदकावच्छेदेन साध्यसिद्धिः प्रतिबन्धिकेत्यपि न, आत्माश्रयात्, असिद्धेश्च।

ननु पर्वतत्वावच्छेदेन वह्निसिद्धिः वह्न्यनुमितिप्रतिबन्धिका। तथा च नात्माश्रयः, नेवाऽन्योन्याश्रयः, ईश्वरज्ञानस्य पर्वतत्वावच्छेदेन वह्निनिश्चयरूपस्य प्रसिद्धत्वात्। अन्यथा ईश्वरज्ञानं सर्वप्रामाण्याधिकरणं न स्यादिति चेत्—न। भ्रमानुमितिस्थले ईश्वरस्य भ्रमानधिकरणत्वेन ईश्वरेऽप्यप्रसिद्धेरपरिहार्यत्वात्।

एतेन पक्षधरोक्तपक्षतालक्षणदूषणेन स्वनिवर्तकीभूतप्रत्यक्षसामग्रीसमवहितसिसाधयिषान्यविषयानुपहितसिसाधयिषाविरहसहकृतसिद्ध्यनुमानातिरिक्ततत्करणान्योन्याभावः पक्षतेति पक्षत्रय्युक्तलक्षणमपास्तमिति ।

अत्रोच्यते — यदधिकरणत्वेन साध्यमनुमितिविषयः तदत्र पक्षता । अथ वा साध्यसन्देहसाध्यानुमित्सान्यतरवत्वं पक्षता । तथा च यत्र सिद्धिर्नास्ति तत्र सन्देहमादाय पक्षता । यत्र यत्र सिद्धिरस्ति तत्र तत्रानुमित्सामादाय पक्षतेति न क्षतिः ।

यद्वा स्वसमानाधिकरणस्वसमानकालीनयावदनुमित्साभावविशिष्टसाध्यसिध्यभावः पक्षता । अत्राद्यविशेषणमन्यानुमित्साप्रागभावविरहमादायान्यानुमित्साविरहेऽतिप्रसङ्गवारकम् । स्वसमानकालीनेति विशेषणं पूर्वोत्पन्नानुमित्साप्रागभावविरहप्रयुक्तविशिष्टाभावस्य सत्त्वेन कालान्तरेऽनुमितिप्रसङ्गवारकम् । यत्किञ्चित्संसर्गाभावमादाय विशिष्टसत्त्वेनानुमित्सायामनुमित्यभावप्रसङ्गवारणार्थं, पूर्वमुत्पन्नानुमित्साप्रागभावविरहमादाय विशिष्टाभावसत्त्वेनानुमित्सा...त्कावनुमितिप्रसङ्गवारकं च । यावत्पदमभावविशिष्टत्वसिद्धेर्लक्षणम्, न तूपलक्षणम् । अत एव प्रागुक्ततदधिकरणाधिकरणकत्वविकल्पप्रयुक्तदोषो नास्तीति ।

न च विशिष्टाभावसत्त्वेनानुमित्यनन्तरमनुमितिः स्यादिति वाच्यम् । विशिष्टाभावस्यानुमित्याननुगुणक्षणासम्बन्धित्वस्य विवक्षितत्वात्, स्वशब्देनानुमितिप्रतिबन्धकसिद्धिर्विवक्षिता तथा च प्रतिबन्धकीभूतपूर्वानुमितिरूपसिद्धेः समानकालीनानुमित्साभावविशिष्टसिद्धानुमित्यन्तरप्रतिबन्धाच्च । अत एवोत्पत्स्यमानसिद्धिसमानकालीनसंसर्गाभावमादाय विशिष्टसत्त्वेनानुमित्सायामनुमित्यभावप्रसङ्गः परिहृतः । उत्पत्स्यमानसिद्धेरिदानीमुत्पन्नानुमितेरप्रतिबन्धकत्वात् ।

न चानुमित्सासिद्ध्योरप्रसिद्धिः । स्वपरसाधारण्येनेहानुमित्या भाव्यमित्येवमादिकालिका या स्वजन्यानुमितिविषयकेच्छा सा पक्षताघटिका । एतादृशेच्छासिद्ध्यभावपक्षतास्थले ईश्वरेच्छा भवत्येवेति नाप्रसिद्धिः । न च प्रमानुमितिस्थले सिध्यप्रसिद्धिः, 'पर्वते वह्निरस्ति' इति भ्रमविषयत्वेन पर्वते वह्निविषयकेश्वरज्ञानस्य प्रसिद्धत्वात् । न च भ्रमत्वमीश्वरज्ञानस्य स्यादिति वाच्यम् । स्वमतेऽतद्वति तत्प्रकारकत्वस्य भ्रमत्वप्रयोजकत्वात् । अथवा सर्वत्रानुमित्सा पक्षता अस्ति । यत्रास्मदाद्यनुमित्सा सम्भवति तत्र सैव पक्षता । यत्र न सा सम्भवति तत्रेश्वरेच्छाऽनुमित्सात्वेन हेतुरिति सैव पक्षता । न चेश्वरेच्छाया अनुमित्यनन्तरं सत्त्वेनानुमित्यनन्तरमनुमित्सादि वाच्यम् । तदानीमनुमित्सात्वेन हेतुत्वाभावात् । न चेश्वरेच्छायाः कार्यमात्रकारणत्वेन, नानुमितौ सविशेषकारणहेतुरिति वाच्यम् । ईश्वरज्ञानस्य कार्यमात्रकारणस्य शुकबालोदितवाक्ये वाक्यार्थ-

ज्ञानत्वेन हेतुत्वमनुमितिविशेषे कार्यकारणभूताया ईश्वरेच्छाया अनुमितसात्वेन हेतुत्वोपपत्तिरित्यलमधिकेन ।

SANS
181.44
TIP

## व्याप्तिनिरूपणम्

ननु व्याप्तिनिश्चयजन्यत्वेन व्याप्तिनिश्चयजन्यत्वमनुमितेर्लक्षणमुक्तम् – तदयुक्तम् – विषयभूतव्याप्तेरेव निर्वक्तुमशक्यत्वात् । तथाहि – न तावत्साध्यसामानाधिकरण्यं व्याप्तिः, व्यभिचारिसाधारणत्वात् ।

नापि साध्यात्यन्ताभाववदवृत्तित्वम्, केवलान्वयिन्यव्याप्तेः ।

नाप्यनौपाधिकत्वम्; उपाधेः साध्यव्यापकत्वे सति साधनाव्यापकत्वं लक्षणम् । तथा चोपाधित्वस्य व्यापकत्वघटितत्वेन, व्यापकत्वं च व्याप्तिनिरूपकत्वं चेति चक्रकाश्रयापत्तेः । न च व्यापकत्वं व्याप्तिनिरूपकत्वं, किं तु तद्वन्निष्ठात्यन्ताभावप्रतियोगिकत्वमिति वाच्यम्; 'इदं संयोगि द्रव्यत्वात्' इत्यत्राव्याप्तेः । न च प्रतियोग्यसमानाधिकरणेति विशेषणेन तल्लक्षणं विशेषणीयमिति वाच्यम्; 'इदं संयोगि सत्त्वात्' इत्यत्र ... व्यापकसंयोगेऽतिव्याप्तेः ।

नापि साधनसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यम्; संयोगसाध्यकद्रव्यत्वादावव्याप्तेः । न च प्रतियोग्यसमानाधिकरणेत्यनेन तद्विशेषणीयमिति वाच्यम्; संयोगसाध्यकव्यभिचारिसत्त्वहेतावतिव्याप्तेः ।

ननु प्रतियोग्यसमानाधिकरणेत्यत्र प्रतियोगिवैयधिकरण्यावच्छेदकावच्छेदेन हेतुसामानाधिकरण्यं विवक्षितम्; अतो नोक्तदोष इति चेत् — न । यदा गोत्वं तदाऽश्वत्वमिति कालिका... वव्याप्तेः ।

किं च प्रतियोग्यसमानाधिकरणेत्यत्रात्यन्ताभावस्य किं यावत्प्रतियोग्यसमानाधिकरण्यं वा यत्किंचित्प्रतियोग्यसमानाधिकरण्यं वा । नाद्यः, 'अयं संयोगसामान्याभाववान् सत्त्वात्' इत्यत्र संयोगसामान्याभावरूपप्रतियोग्यसमानाधिकरणस्य कपिसंयोगाभावरूपप्रतियोगिसमानाधिकरणस्य च संयोगरूपाभावस्य यावत्प्रतियोग्यसमानाधिकरणभिन्नत्वेन यावत्प्रतियोग्यसमानाधिकरणो यः संयोगरूपाभावादन्य एव घटाद्यभावः तदप्रतियोगिसंयोगसामान्याभावसाध्यकव्यभिचारिसत्त्वहेतावतिव्याप्तेः ।

न द्वितीयः, 'अयं संयोगात्यन्ताभाववान् वृक्षत्वात्' इत्यत्र संयोगसामान्याभावरूपं प्रतियोग्यसमानाधिकरणकपिसंयोगरूपाभावप्रतियोगिकपिसंयोगात्यन्ताभावसाध्यकसद्धेतावव्याप्तेः ।

ननु यत्किञ्चित्प्रतियोग्यसमानाधिकरण्यमेव विवक्षितम् । न च 'अयं कपिसंयोगाभाववान् वृक्षत्वात्' इत्यत्राव्याप्तिरिति वाच्यम्; यत्प्रतियोग्यसमानाधिकरण्यमभावे उच्यते



IGNCA RAR
ACC No R-550

तद्वृत्तिप्रतियोगितावच्छेदकावच्छिन्नत्वस्य साध्यव्यक्तेर्विवक्षितत्वात् तेनायमर्थः सम्पन्नः, प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणात्यन्ताभावाप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिः।

नन्ववच्छेदकसर्गलक्षणमुक्तम्। अवच्छेदकत्वं चावच्छित्तिप्रत्ययजनकत्वम्। जनकत्वं च नियतपूर्ववृत्तित्वम्। नियमो व्याप्तिरिति चक्रकाश्रय इति चेत्—न। अनतिप्रसक्तस्यैवाव-च्छेदकशब्दार्थत्वात्। नन्वतिप्रसक्तमन्तरा घटकत्वे सति अनतिप्रसक्तत्वं वाऽवच्छेदकत्वं उतानति-प्रसक्तत्वं वा।

न तावदाद्यः, 'अयं सुरभिधूमवान् वह्नेः', इत्यत्रोक्तरीत्या केवलधूमत्वस्यावच्छेदत्वे-नानवच्छेदकीभूतसुरभिधूमत्वावच्छिन्नसाध्यसामानाधिकरण्यं वह्निरस्तीति धूमव्यभिचारिणि वह्नावति-व्याप्तिः।

न द्वितीयः, सर्वेषां वह्नीनां धूमसमानाधिकरणाभावप्रतियोगित्वेन वह्नित्वस्य प्रतियोगि-तावच्छेदकत्वे वह्निसाध्यधूमेऽव्याप्तिः।

न च यदभावप्रतियोगिवृत्तित्वे सति तदभावप्रतियोगिव्यावृत्तत्वं वह्न्यवच्छेदकत्वम्, प्रकृते च वह्नित्वस्य महानसनिष्ठपर्वतीयवह्न्यभावप्रतियोगिवृत्तित्वेऽपि तदभावाप्रतियोगिमहानस-वृत्तिवह्निव्यावृत्तत्वाभावेनावच्छेदकत्वे सिद्धे न धूमेऽव्याप्तिरिति वाच्यम्। यदा जातिस्तदा व्यक्तिरिति व्यभिचारिकालिकव्याप्तिस्थले, व्यक्तित्वस्य घटध्वंसप्रतियोगिवृत्तित्वेऽपि घटध्वंसा-प्रतियोगिपटव्यावृत्तत्वाभावेनानवच्छेदकत्वे सिद्धे व्यक्तित्वावच्छिन्नव्यक्तिसमानाधिकरणजातावति व्याप्तिरिति चेत्—

मैवम्—यदधिकरणनिष्ठाभावप्रतियोगिवृत्तित्वे सति तदधिकरणनिष्ठाभावप्रतियोगिव्या-वृत्तत्वमेवावच्छेदकत्वम्। अस्ति च व्यक्तित्वे उक्तावच्छेदकत्वम्; व्यक्तित्वस्य व्यक्तिध्वंसाधिकरण-प्रलयकालवृत्तिव्यक्तिध्वंसप्रतियोगिवृत्तित्वे सति तदधिकरणनिष्ठध्वंसाप्रतियोग्याकाशव्यावृत्तत्वात्। न च धूमे व्याप्तिरपि वह्नित्वस्य पर्वतवृत्तिमहानसीयवह्न्यभावप्रतियोगिवृत्तित्वे सति तदधिकरण-वृत्त्यभावाप्रतियोगिपर्वतवृत्तिवह्निव्यावृत्तत्वाभावात्। न च सर्वेषामभावानां कालरूपाधिकरणे प्रतियो ... समानाधिकरणत्वादुक्तलक्षणमसम्भवीति वाच्यम्। प्राह्यसामानाधिकरण्याप्रविष्टसंबन्धेन प्रतियोग्यसामानाधिकरण्यस्यैवाभिप्रेतत्वात्।

नन्वेवमपि नैतल्लक्षणं यदा गोत्वं तदा अश्वत्वं कालिकव्याप्तौ गोत्वसमानकालीनाश्वत्वा-त्यन्ताभावप्रतियोग्यश्वत्वसाध्यकगोत्वेऽव्याप्तिरिति चेत्—न, अत्यन्ताभावपदस्य विरोधिसंसर्गाभाव-

परत्वेन गोत्वस्य गोत्वसमानकालीनव्यक्तिध्वंसाप्रतियोग्यश्वत्वसाध्यकत्वात् । न च सर्वेषां वह्नीनां साधिकरणपर्वतादौ समवायसम्बन्धेनावृत्तित्वा...समानाधिकरणसमवायवह्न्यभावप्रतियोगित्वेनासंभव इति वाच्यम् । ग्राह्यसामानाधिकरण्यप्रविष्टसंबन्धावच्छिन्नप्रतियोगिताकाभावस्य विवक्षितत्वात् प्रतियोग्यसमानाधिकरणाभाव इत्यस्य ग्राह्यसामानाधिकरण्यविरोधितावच्छेदकरूपेणोपस्थिताभाव इत्येवार्थः । अन्यथा प्रमेयत्वेन तादृशाभावज्ञाने तद्प्रतियोगित्वज्ञानादनुमितिः स्यात् ।

न चैवं प्रतियोग्यसमानाधिकरणाभाव इत्यस्य ग्राह्यसामानाधिकरण्यविरोधितावच्छेदकरूपेणोपस्थितपरत्वे ग्राह्यसामानाधिकरण्यप्रविष्टसंबन्धावच्छिन्नत्वमभावविशेषणं व्यर्थमिति वाच्यम् । वह्न्यत्यन्ताभाववद्ध्रुवत्वविशिष्टवह्न्यन्योन्याभावस्यापि ग्राह्यसामानाधिकरण्यविरोधितावच्छेदकावच्छिन्नत्वेन वह्नेस्तादृशान्योन्याभावप्रतियोगित्वादसम्भवापत्तेः । तस्मात् ग्राह्यसामानाधिकरण्यप्रविष्टसंबन्धावच्छिन्नग्राह्यसामानाधिकरण्यविरोधितावच्छेदकरूपेणोपस्थितहेतुसमानाधिकरणयावदभावप्रतियोगितानवच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिलक्षणं **पक्षधरोक्तं** निर्दुष्टमिति-

मैवम् — न हि ग्राह्यसामानाधिकरण्ये विरोधितावच्छेदकरूपेणोपस्थितमात्रमभावविशेषणम् । किं तु हेतुसमानाधिकरणेति विशेषणमपि । तथा च यो वह्न्योन्याभावः हेतुसमानाधिकरणमविशेषणमपि । तथा च यो वह्न्यन्योन्याभावः हेतुसमानाधिकरणः; स चाभावग्राह्यसामानाधिकरण्यविरोधितावच्छेदकरूपेणोपस्थितः । यो ह्रदविशिष्टवह्न्यन्योन्याभावग्राह्यसामानाधिकरण्यविरोधितावच्छेदकरूपेणोपस्थितः, स च हेतुसमानाधिकरणो न भवतीति हेतुसमानाधिकरणपदेनासम्भववारणं सम्भवति । ग्राह्यसामानाधिकरण्यप्रविष्टसम्बन्धावच्छिन्नेति विशेषणवैयर्थ्यात् । न च वह्न्यन्योन्याभावस्य ह्रदवृत्तित्वेन विरोधितावच्छेदकावच्छिन्नत्वं पर्वतवृत्तित्वेन हेतुसामानाधिकरण्यं चास्तीति वाच्यम्; संयोगाभावस्यापि तथात्वेन संयोगसाध्यकद्रव्यत्वेऽव्याप्तेः ।

किं च न ह्यप्रतियोगिसामानाधिकरण्यं मात्रं लक्षणम्, येनासम्भवः । किं तु प्रतियोगितावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यम् । तथा च तादात्म्यमेव वह्न्यन्योन्याभावप्रतियोगितावच्छेदकम्, केवलवह्नित्वं तु वह्न्यन्योन्याभावप्रतियोगितावच्छेदकमेवेति कासम्भवशङ्कापि ।

अपि चोक्तलक्षणं 'सर्वमिदं संयोगि द्रव्यत्वात्' इत्यत्रातिव्याप्तम् । तथाहि — ग्राह्यसामानाधिकरण्यविरोधितावच्छेदकं अत्यन्ताभावत्वमात्रं न कपिसंयोगवद्वृत्तिकपिसंयोगाभावेऽपि सत्वात्, किं तु व्याप्यवृत्त्यत्यन्ताभावत्वम् । तथा च ग्राह्यसामानाधिकरण्यविरोधितावच्छेदकरूपेणोपस्थितो यावान् स त्वसमानाधिकरणघटाद्यभावस्तद्प्रतियोगिसंयोगिसमानाधिकरणत्वेन तत्रातिव्याप्तिर्वज्रलेपायिता ।

न च प्रतियोग्यनधिकरणाधिकरणकाभावत्वं विरोधितावच्छेदकम् । तथा च संयोगानधिकरणकर्माधिकरणकसंयोगाभावप्रतियोगिसंयोगसाध्यकसत्त्वहेतौ नातिव्याप्तिरिति वाच्यम्; 'इदं संयोगि द्रव्यत्वात्' इत्यत्रातिव्याप्तेः । यदि प्रतियोगिवैयधिकरण्यावच्छेदकावच्छेदेन हेतुसामानाधिकरण्यं विवक्षितं तदा ग्राह्यसामानाधिकरण्यविरोधितावच्छेदकरूपेणोपस्थित इत्येतत् व्यर्थमापतितम् । न च प्रमेयत्वे ... व्याप्तिज्ञानेनानुमितिः स्यादित्यतिप्रसङ्गवारकत्वेन तत्सार्थकमिति वाच्यम्, उक्तव्याप्त्यादीनां लक्षणदूषणानामन्यतमसम्भवात् ।

किं च 'कालो जगदाधारः कालत्वात्' इत्यत्राव्याप्तेः । तथाहि — जगच्छब्देन विश्वं ... प्रतिपाद्यते । एवं च जगदाधाराभावस्य जगच्छब्दार्थत्वेन तदधिकरणत्वं कालस्यावश्यं वाच्यम्, अन्यथा सर्वाधारत्वभङ्गप्रसङ्गः । तथा च ग्राह्यसामानाधिकरण्यप्रविष्टसंबन्धावच्छिन्नग्राह्यसामानाधिकरण्यविरोधितावच्छेदरूपोपस्थितकालत्वरूपहेतुसमानाधिकरणजगदाधारत्वाभावप्रतियोगिसाध्यककालत्वव्याप्तेः । न च जगदाधारत्वाभावः काले दिशि च प्रतियोगिसमानाधिकरण इति प्रतियोग्यसमनाधिकरणपदेनाव्याप्तिः परिहरणीयेति वाच्यम्; 'कालो जगदाधारः द्रव्यत्वात्' इत्यत्रातिव्याप्तेः ।

किं च ग्राह्यसामानाधिकरण्यप्रविष्टसंबन्धः कचित् संयोगः, कचित् समवायः, कचित् स्वरूपसम्बन्ध इति वाच्यम् । तथा च 'अयं धूमाभाववान् वह्नेः' इत्यत्र ग्राह्यसामानाधिकरण्यप्रविष्टः संयोगावच्छिन्नवह्निरूपहेतुसमानाधिकरणो यो घटाद्यभावः तदप्रतियोगिधूमाभावसाध्यकवह्नावतिव्याप्तिः । अपि च 'इदमभिधेयं प्रमेयत्वात्' इत्यत्र ग्राह्यसामानाधिकरण्यप्रविष्टप्रमेयत्वरूपस्वरूपसंबन्धस्य प्रमेयत्वसमानाधिकरणघटाद्यभावप्रतियोगितानवच्छेदकत्वेनोक्तकेवलान्वयिन्यव्याप्तिः ।

किं च तदधिकरणनिष्ठाभावप्रतियोगिवृत्तित्वे सति तदधिकरणनिष्ठाभावप्रतियोगिव्यावृत्तत्वमवच्छेदकत्वमित्येतदप्यपास्तम् । तथाहि — 'अयं धूमवान् वह्नेः' इत्यत्र धूमत्वस्य धूमध्वंसाधिकरणपर्वतनिष्ठधूमध्वंसप्रतियोग्यतीततद्धूमवृत्तित्वे सति तद्ध्वंसाप्रतियोगिमाहानसवर्तमानधूमव्यावृत्तत्वाभावात् तत्रातिव्याप्तिः ।

किं च 'विशेषोऽभिधेयः प्रमेयत्वादि'त्यत्र प्रमेयत्वाभिधेयत्वयोरेकत्र संबन्ध एव ह्यत्र ग्राह्यसामानाधिकरण्यं तद्विरोधितावच्छेदकरूपेणोपस्थितस्य हेतुसमानाधिकरणाभावस्याप्रसिध्या उक्तप्रमेयत्वहेतावतिव्याप्तिरिति —

अत्र ब्रूमः — ग्राह्यसामानाधिकरण्यप्रविष्टसंबन्धेन यद्यद्धर्मावच्छिन्नाधिकरणानधिकरणे यावति यद्यद्धर्मावच्छिन्नसामानाधिकरण्याभावः तद्धर्मावच्छिन्नसामानाधिकरण्यं तद्धर्मावच्छिन्नस्य

व्याप्तिः । न च वह्न्यधिकरणावृत्तिधूमावयववृत्तिवह्न्यत्यन्ताभावे धूमसामानाधिकरण्यमस्तीति वह्नि-साध्यकधूमेऽव्याप्तिरिति वाच्यम् । हेतुसामानाधिकरण्याभावपदेन साध्याधिकरणेन हेतोर्यादृश-सम्बन्धोऽस्ति तेन हेत्वधिकरणावृत्तित्वस्य विवक्षितत्वात् । इयं विवक्षा "**अवच्छेदकत्वनिरुक्ता**" वक्ष्यनुसन्धेया । अत्र ग्राह्येत्यादिविशेषणमसम्भववारकम् । यद्धर्मावच्छिन्नेति विशेषणं धूमेऽव्याप्ति-वारकम् । यावतीति पदं 'वह्निमान् प्रमेयत्वात्' इत्यादावतिव्याप्तिवारकम् ।

अथ यावदधिकरणे यावति यस्य वृत्तिः तत्तस्य वृत्तिमतो व्याप्यम् । यत्सम्बन्धि-तावच्छेदकरूपत्वं यस्य तत्तस्य व्याप्यम् । अवच्छेदकत्वं तु यत्सामानाधिकरण्यानधिकरणे यावति यदधिकरणसामानाधिकरण्याभावः तत्त्वं तत्सम्बन्धितावच्छेदकत्वमित्यन्यदेतत् । यत्सम्बन्धितेत्यत्र यच्छब्देन साध्यत्वेनाभिमतं विवक्षितम् । सम्बन्धिताशब्देन सामानाधिकरण्यं विवक्षितं अस्यामस्मदुक्त**लक्षणराजौ** वृत्त्यवच्छेदकत्वनिरुक्तौ बहुविधं कृत्वा वृत्त्यवच्छेदकत्वं (?) निरुक्तम् । यदधिकरणे यावति यस्य वृत्तिः तत्तस्य वृत्तिमतो व्यापकस्य तदवच्छेदकं व्याप्यम्, नत्वभावगर्भं व्याप्यलक्षणं दूषितत्वादित्यलमधिकेन ।

## हेत्वाभासनिरूपणम्

हेत्वाभासजन्यानुमितित्वं भ्रमानुमितिलक्षणमुक्तम् — अयुक्तम् — तस्यैवानिर्वचनीय-त्वात् । न तावद्धेतुलक्षणरहितत्वे सति हेतुवदाभासमानत्वं हेत्वाभासत्वम् । हेतुलक्षण-राहित्यस्य निर्वक्तुमशक्यत्वात् । न च पञ्चम्यन्तादातृतीयान्तं (?) यद्धेतुतोप्रतिपादकं वचनं तद्राहित्यं तदर्थ इति वाच्यम्; स्वार्थानुमानधूमेऽव्याप्तेः । न च पञ्चरूपराहित्यं हेतुलक्षण-राहित्येन विवक्षितमिति वाच्यम्, केवलव्यतिरेकिणि सिद्धे ... तिव्याप्तेः । न च यस्य हेतोर्यावन्ति रूपाणि सन्ति तावद्रूपराहित्यं तदर्थ इति वाच्यम्, यत्तदादिघटितत्वेनाननुगमात्, इतरपदवैयर्थ्याच्च ।

किं च पक्षस्य प्रकृतसाध्यराहित्यरूपसाधकत्वसाध्ये पञ्चहेत्वाभासानां पञ्चरूपोपपन्नत्वेना-सम्भवापत्तेः । न च पक्षे तेषां तादृशासाधकतान्यसाध्ये हेत्वाभासत्वमिति तदन्यसाध्य-विवक्षायां नोक्तदोष इति वाच्यम्, पक्षस्य प्रमेयत्वादिसाध्ये तेषां सद्धेतुत्वादसम्भवदोषताद-वस्थ्यात् । अथ वा 'अयं पक्षस्थः प्रकृतहेतुव्यापकसाध्यकरी असिद्धाहेतुमत्वात्' इत्यत्रासिद्धादेः पञ्चरूपोपपन्नत्वेनासम्भव एव ।

नाप्यनुमितिप्रतिबन्धकत्वम्; कामिनीजिज्ञासायामतिव्याप्तेः । न चानुमिति प्रतिबन्धकज्ञानविषयत्वं हेत्वाभासत्वमिति वाच्यम्; 'धूमो वह्निव्यभिचारी'ति ज्ञानेनानुमिति प्रतिबन्धेन तादृशज्ञानविषयधूमेऽतिव्याप्तेः । न च धूमेऽतिव्याप्तिवारणार्थं यथार्थेति ज्ञानविशेषणं

L. 6.

देयमिति वाच्यम् । ज्ञानस्य विशेषणत्वं, उपलक्षणत्वं वा । नाद्यः, नित्यदोषसाधारणानैकान्तिकादावव्याप्तेः । न द्वितीयः, रूपसाधारणसत्प्रतिपक्षोत्तीर्णदशायां सद्धेतावतिव्याप्तेः ।

किं च ज्ञानस्य प्रतिबन्धकत्वं किमवच्छेदेन ग्राह्यम्? न तावद्धेतुज्ञानत्वेन ; सद्धेतुसाधारणत्वात् । नापि साधारणत्वादिज्ञानत्वेन ; अननुगमात् , असाधकतानुमितिजनकसाधारणत्वादिज्ञानसाधारणत्वाच्च । न च स्वसाध्यानुमित्यजनकज्ञानत्वेन साधारण्यज्ञानत्वस्याप्रतिबन्धकत्वापत्तेः । साधारण्यज्ञानस्यापि साध्यविशेषविषयकानुमितिजनकत्वात् ।

अपि चानुमितिप्रतिबन्धकत्वं साक्षात्, परम्परया वा । नाद्यः; व्याप्तिज्ञानप्रतिबन्धकव्यभिचारज्ञानादावव्याप्तेः । नापरः; बाधसत्प्रतिपक्षयोरव्याप्तेः, उपाधिज्ञानेऽतिव्याप्तेश्च । न च साक्षादनुमितितत्करणान्यतरप्रतिबन्धकत्वं विवक्षितमिति वाच्यम्, विकल्पासहत्वात् । तथाहि — व्याप्तिज्ञानस्य वाऽनुमितिकरणत्वं उत परामर्शत्वं वा । नाद्यः; 'आकाशमनित्यं कृतकत्वात्' 'अनित्यः शब्दः शब्दत्वात्' इत्यत्र व्याप्तेः सत्त्वेन तत्रासिद्धिज्ञानासाधारण्यज्ञानयोः ग्राह्याभावानवगाहित्वेन नाप्रतिबन्धकत्वप्रसङ्गात् । नापरः, परामर्शविषयव्याप्तिविशिष्टपक्षधर्मताया उक्तसाधारणहेतौ सत्त्वादुक्तदोषानतिवृत्तेः । किं च बाधसत्प्रतिपक्षयोः साक्षादनुमितिप्रतिबन्धकत्वमपि चिन्त्यम् ।

Indira Gandhi National Centre for the Arts

एतेन **मणौ** यद्विषयताया ज्ञानस्यानुमितिप्रतिबन्धकत्वं तत्त्वं वा, ज्ञायमानं सदनुमितिप्रतिबन्धकत्वं वा, अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकरूपवत्वं वा यद्धेत्वाभासलक्षणमुक्तम् — तत्प्रत्युक्तम् — तेषां लक्षणानां प्रतिबन्धकज्ञानगर्भत्वात् ।

**अत्रोच्यते** — यस्मिन् साध्ये यस्य हेतोः यादृशानि यावन्ति पक्षधर्मत्वादिरूपाणि परिगणितानि सन्ति तादृशानां तावतां रूपाणामन्यतमरूपविरोधिरूपत्वान् स तस्मिन् साध्ये हेत्वाभासः । पक्षधर्मत्वादिरूपविरोधिरूपं न सिध्येदित्यन्यदेतत् ।

यद्वा यस्मिन् साध्ये यस्य हेतोर्यादृशानि यावन्ति रूपाणि परिगणितानि तावद्रूपोपपन्नस्तस्मिन् साध्ये सद्धेतुः तदन्यो हेत्वाभास इति । न च हेत्वाभासलक्षणद्वयेऽपि यत्तदादिप्रवेशात् तदननुगमदोष इति वाच्यम्; यो यस्य पिता स तस्य धनं गृह्णीयादिति शब्दश्रोतुः सकलजनस्य स्वपितृधने नियतप्रवृत्त्यभावप्रसङ्गात् ।

## तद्भेदनिरूपणम्

हेत्वाभासः पञ्चविधः — असिद्धविरुद्धानैकान्तिकप्रकरणसमकालात्ययापदिष्टभेदात् ।

## असिद्धनिरूपणम्

तत्र व्याप्तिग्रहानुपयुक्तविशेषणाभावविशिष्टस्य हेतोः पक्षे साध्यसामानाधिकरण्याभाववत्त्वमसिद्धमित्यसिद्धसामान्यलक्षणम् । हेतोः क्वचित्पक्षस्याभावात्, क्वचित् साध्यस्याभावात्, क्वचित् पक्षे साध्यसामानधिकरण्याभावात्, क्वचित् स्वस्याभावात्, क्वचित् स्वस्य व्याप्तीत्यादिविशेषणाभावात् असिद्धस्य सर्वस्यापि उक्तलक्षणलक्षितत्वेन नाव्याप्तिरिति । न चानिश्चितपक्षवृत्तित्वमसिद्धलक्षणमिति वाच्यम्; व्याप्यत्वासिद्धेऽव्याप्तेः ।

## तद्भेदनिरूपणम्

आश्रयासिद्ध - स्वरूपासिद्ध - व्याप्यत्वासिद्धभेदात् ।

## आश्रयासिद्धनिरूपणम्

तत्रानिश्चितपक्षकत्वमाश्रयासिद्धलक्षणम् ।

## स्वरूपासिद्धनिरूपणम्

पक्षेऽविद्यमानत्वं स्वरूपासिद्धलक्षणम् ।

## व्याप्यत्वासिद्धनिरूपणम्

पक्षे व्याप्यत्वेनाविद्यमानत्वं व्याप्यत्वासिद्धलक्षणम् ।

## विरुद्धनिरूपणम्

सध्यवदवृत्तिधर्मो विरुद्ध इति विरुद्धलक्षणम् । तच्च साध्यविपर्ययव्याप्तत्वमिति वाच्यम् । इदमसाधकं साध्यविरोधिसमानाधिकरणत्वादित्येतावन्मात्रेणासाधकतासाधने सम्भवति शेषवैयर्थ्यात् ।

## अनैकान्तिकनिरूपणम्

सपक्षवृत्तिविशिष्टपक्षपक्षव्यावृत्त्यभाववत्त्वमनैकान्तिकस्य लक्षणम् । अयं विशिष्टाभावः असाधारणानैकान्तिके विशेषणाभावप्रयुक्तः सम्भवति । साधारणानैकान्तिके तु विशेष्याभावप्रयुक्तविशिष्टाभाव इति न किञ्चिदनुपपन्नम् । यद्यप्यनुपसंहारिणीदं लक्षणमव्याप्तं, तथापि साधारणासाधारणयोरेव नानैकान्तिकत्वमिति **एकदेशिमत**मवलम्ब्येदं लक्षणमयुक्तम् । अनुपसंहार्यसाधारणासाधारणलक्षणं वक्ष्यते । हेत्वाभासत्वे सति साधारण्याभावविशिष्टपक्षवृत्त्यभाववत्त्वं त्रिविधानैकान्तिकस्य लक्षणम् । अत्र प्रथमविशेषणं केवलव्यतिरेक्यतिव्याप्तिवारकम् । साधारण्याभावविशिष्टे सपक्षवृत्तिविशेषणं साधारणानैकान्तिकेऽव्याप्तिवारकम् ।

## मतान्तरं तत्खण्डनं च

*यत्तु गणेश्वरटीकायाम्–'अनैकान्तिकत्रितयसाधारणमसाधारण्याभावकालावच्छिन्नसाध्यव्याप्यत्वाभाववत्त्वे सति असाधारण्याभावकालावच्छिन्नविरुद्धत्वाभाववत्त्वं लक्षणमि'ति–तन्न–'सर्वमभिधेयं प्रमेयत्वात्' इत्यनुपसंहारित्वेन स्वेनोदाहृतप्रमेयत्वे 'नित्यः शब्दः कृतकत्वात्' इति विरुद्धसङ्कीर्णसाधारणे चाव्याप्तेः।

सव्यभिचारोऽनैकान्तिक इति – तन्न – व्यभिचारस्य साध्यात्यन्ताभाववद्वृत्तित्वेनासाधारणानैकान्तिकेऽव्याप्तेः। अस्मदुक्तव्यभिचारे व्यतिरेकेणोभयानुगतव्यभिचारस्य निर्वक्तुमशक्यत्वात्।

## अनैकान्तिकभेदनिरूपणम्

अनैकान्तिकस्त्रिविधः – अनुपसंहार्यसाधारणसाधारणभेदात्।

## अनुपसंहारिनिरूपणम्

तत्राविद्यमानदृष्टान्तत्वमनुपसंहारिणो लक्षणम्।

## असाधारणनिरूपणम्

सति पक्षे पक्षमात्रवृत्तित्वमसाधारणलक्षणम्।

## साधारणनिरूपणम्

विपक्षवृत्तित्वं साधारणानैकान्तिकलक्षणम् – तदसत् – विपक्षवृत्तित्वस्यैव लक्षणत्वे शेषवैयर्थ्यात्।

## प्रकरणसमनिरूपणम्

स्वपक्षपक्षकत्वे सति स्वसाध्यविरुद्धाबाधितसाध्यसाधकत्वेनाभिमतहेत्वन्तरं प्रकरणसम इति प्रकरणसमलक्षणम्। तत्राद्यविशेषणेन 'अनित्यः शब्दः कृतकत्वात्' इत्यत्र 'नित्य आत्मा विभुत्वात्' इत्यत्र च प्रकरणसमत्ववारकम्। अन्तरपदमसाधारणवारकम्। अन्यतरस्य हेतोर्वास्तवस्वसाध्यसाधकत्वाभावेनासम्भववारणार्थमभिमतपदम्। अबाधितपदं बाधितविषयवारकम्।

## कालात्ययापदिष्टनिरूपणम्

यत्र प्रमितो यो धर्मस्तत्र तद्विरुद्धसाध्यको हेतुः कालात्ययापदिष्ट इति कालात्ययापदिष्टलक्षणम्। ननु पक्षसपक्षविपक्षज्ञाने तद्घटितलक्षणमेव ज्ञातुं न शक्यत इति चेत् — अनुमितसा-

---

* B, 2226 / D. 6309 संख्याकमातृकायां ऊनत्रिंशपुटे उत्तरभागे तृतीयपङ्क्तिरियम्।

विरहसहकृतसिद्ध्यभावः पक्षस्य लक्षणम्। यत्र प्रत्यक्षेण वह्निसिद्धावप्यनुमित्सयाऽनुमानं प्रवर्तते, तत्र विशेषणाभावप्रयुक्तविशिष्टाभावः। तदन्यस्थले विशेष्याभावप्रयुक्तविशिष्टाभावः। अत्र भूषण-दूषणविचारणं प्रागुक्तपक्षतालक्षणे द्रष्टव्यम्। निश्चितसाध्यवत्त्वं सपक्षस्य लक्षणम्। आद्यपदं पक्षव्यावर्तकम्। निश्चितसाध्यात्यन्ताभाववत्त्वं विपक्षस्य लक्षणम्। अत्र प्रथमपदं पक्षवारकम्।

## सद्धेतुनिरूपणम् तद्भेदनिरूपणं च

ननु सद्धेतुभिन्नत्वं हेत्वाभासत्वमिति प्रागुक्तम्। सद्धेतवः कतिविधाः? किं लक्षणकाः?— उच्यन्ते — ते त्रिविधाः — अन्वयव्यतिरेकि - केवलान्वयि - केवलव्यतिरेकिभेदात्।

## अन्वयव्यतिरेकिनिरूपणम्

तत्र क्वचित् निश्चितनिश्चिताभावप्रतियोगि यत्तत्साध्यकत्वे सति सद्धेतुत्वमन्वय-व्यतिरेकिणो लक्षणम्। सद्धेतुत्वं च प्रागेव निरुक्तम्। क्वचित् निश्चितसाध्यविशेषणं केवलान्वयि-वारकम्। सद्धेतुपदमन्वयव्यतिरेक्याभासवारकम्।

## केवलव्यतिरेकिनिरूपणम्

क्वाप्यनिश्चितसाध्यकत्वे सति सद्धेतुत्वं केवलव्यतिरेकिणो लक्षणम्। क्वाप्यनिश्चित-पदमन्वयव्यतिरेकिवारकम्। इतरद्धेत्वाभासवारकम्।

Indira Gandhi National ... the Arts

## केवलान्वयिनिरूपणम्

केवलान्वयिसाध्यकत्वं केवलान्वयिनो लक्षणम्। साध्यस्य केवलान्वयित्वं च सकल-पदार्थवृत्तित्वं, यावदीश्वरज्ञानविषयत्वं वा नान्यदिति। न च नान्यदित्यसङ्गतम्, अत्यन्ताभावा-प्रतियोगित्वरूपस्य केवलान्वयिलक्षणस्य सत्त्वादिति वाच्यम्; विकल्पासहत्वात्। तथा हि— अत्यन्ताभावपदेन सप्तमपदार्थभूताभावो विवक्षितः, उत भावाभावसाधारणो वा। नाद्यः; घटात्यन्ताभावादावतिव्याप्तेः। न द्वितीयः; आकाशरूपात्यन्ताभावाप्रतियोगिन्याकाशरूपात्यन्ता-भावे केवलान्वयिन्यव्याप्तेः।

न च वृत्तिमतीत्यभावविशेषणं देयमिति वाच्यम्; कपिसंयोगरूपवृत्तिमदभावप्रतियोगि-कपिसंयोगात्यन्ताभावे केवलान्वयिन्यव्याप्तेः। न च स्वप्रतियोगिवृत्तिविरोधिवृत्तिमदभावो विवक्षितः, तथा च कपिसंयोगरूपाभावः स्वप्रतियोगिकपिसंयोगरूपाभाववृत्तिवृत्तिमन्न भवतीति तदन्य एव घटाद्यभावः तादृशः तदप्रतियोगिकपिसंयोगात्यन्ताभावे नाव्याप्तिरिति वाच्यम्; कपिसंयोगाभावस्य स्वप्रतियोगिवृत्तिविरोधिवृत्तिमदभावभिन्नत्वेनान्यः तादृशो घटाद्यभावः तदप्रति-योगिकपिसंयोगेऽतिव्याप्तेः।

ननु प्रतियोग्यधिकरणवृत्तिमदभावो विवक्षितः। तथा च कपिसंयोगाभावस्य स्वप्रतियोगिकपिसंयोगाभावाधिकरणवृत्तित्वेन कपिसंयोगान्याप्रतियोगिन्यपि संयोगाभावेनाव्याप्तेः, कपिसंयोगे नातिव्याप्तिः। कपिसंयोगरूपाभावस्य संयोगसामान्याभावरूपप्रतियोग्यनधिकरणद्रव्यवृत्तिकपिसंयोगाभावप्रतियोगित्वादिति चेत् — न। संयोगसामान्याभावरूपयत्किञ्चित्प्रतियोग्यनधिकरणद्रव्यवृत्तिकपिसंयोगरूपाभावप्रतियोगिकपिसंयोगाभावेऽव्याप्तेः, यावत्प्रतियोग्यनधिकरणेति विवक्षापि न कपिसंयोगाभावरूपप्रतियोग्यनधिकरणवृत्तिसंयोगरूपाभावान्यविवक्षितपदार्थभावाप्रतियोगिसंयोगसामान्याभावेनातिव्याप्तेः।

न चान्योन्याभावप्रतियोगितानवच्छेदकत्वं केवलान्वयित्वं रुचिदत्तोक्तं युक्तमिति वाच्यम्; विकल्पासहत्वात्। तथाहि — लक्षणघटकान्योन्याभावः प्रसिद्धो वाऽप्रसिद्धो वा। नान्त्यः; अप्रसिद्धेरेव दोषत्वात्। द्वितीये तादृशान्योन्याभावप्रतियोगितावच्छेदकत्वविशेषात् भावो वा विवक्षितः, घटान्योन्याभावप्रतियोगितानवच्छेदकपटत्वेऽतिव्याप्तेः। द्वितीये प्रमेयत्वाश्रयात् सर्वे उक्ताभावप्रतियोगिनो वा। नाद्यः; केवलान्वयित्वेनाभिमतस्य प्रमेयत्वस्य प्रतियोगिमात्रवृत्तित्वेनावच्छेदकत्वाभावात्। अनतिप्रसक्तत्वमात्रमवच्छेदकत्वे प्रयोजकम्, न तु प्रतीतिप्रकारकत्वमपि; गौरवात्। घटान्योन्याभाव इत्यत्र घटे तादात्म्यस्यानवच्छेदकत्वापत्तेः। न चेष्टापत्तिः, अपसिद्धान्तात्। न द्वितीयः; अप्रतियोगिनिष्ठासाधारणधर्मेऽतिव्याप्तेरित्यलमधिकेन।

## कारणनिरूपणम्

न तावत् पूर्ववृत्तित्वं कारणत्वम्; रासभादिसाधारण्यात्। नापि नियतपूर्ववृत्तित्वम्, पटं प्रति तन्तुरूपस्य कारणतापत्तेः। न च तन्तुरूपस्य यमादायैव यस्य यं प्रति पूर्ववृत्तित्वमेवावगम्यते तत्तेनान्यथासिद्धमिति अन्यथासिद्धलक्षणलक्षितत्वेन तत्रानन्यथासिद्धत्वेनातिप्रसङ्गः परिहरणीय इति वाच्यम्; उक्तान्यथासिद्धलक्षणस्य पटसाक्षात्कारहेतुभूतचक्षुःपटसंयोगपटरूपहेतुतन्तुरूपयोरव्याप्तेः।

किं चान्यथा कारणत्वादन्येन रूपेण सिद्धिः उत्पत्तिः ज्ञप्तिर्वा। नाद्यः; — आकाशादीनामनुत्पन्नतयाऽनन्यथासिद्धत्वप्रसङ्गात्। न द्वितीयः; घटादिकं प्रति दण्डादेरन्यथासिद्धिप्रसङ्गात् दण्डत्वादिनापि ज्ञानात्। किं च कारणत्वगर्भमन्यथासिद्धत्वम्; अन्यथासिद्धगर्भं च कारणत्वमिति ज्ञप्तावन्योन्याश्रयः। अपि च नियमः कालिको दैशिको वा। नाद्यः; घटोत्पत्तेः पूर्वं रासभस्यापि क्वचिद्देशे सत्त्वनियमेन रासभादावतिव्याप्तेर्दुष्परिहारत्वात्। तथाहि — कार्यदेशे पूर्ववृत्तित्वं किं साक्षात्सम्बन्धेन उत सम्बन्धमात्रेण वा। नाद्यः; अदृष्टादिरूपकारणाव्याप्तेः घटादिदेशे तेषां

साक्षादसम्बन्धात्। न द्वितीयः; रासभादेरपि परम्परासम्बन्धेन घटादिदेशवृत्तितानियमेनातिव्याप्तितादवस्थ्यात्।

किं च पूर्ववृत्तित्वं प्रागभावावच्छिन्नसमयवृत्तित्वमिति वाच्यम्। तथा च प्रागभावस्य विशेषणत्वमुपलक्षणत्वं वा। नाद्यः; प्रागभावे प्रागभावप्रसङ्गात्। न द्वितीयः; व्यावर्तकत्वेऽपि लक्षणाभावात्, समयेऽव्याप्तेश्च।

नापि पारिमाण्डल्यावच्छिन्नवस्तुत्वं कारणसामान्यलक्षणम्; आदिशब्दग्राह्यस्य वक्तुमशक्यत्वात् व्यर्थविशेषणघटितत्वादिति चेत्—**अत्रोच्यते**—वस्तुत्वमेव कारणसामान्यलक्षणम्। न चापसिद्धान्तः, **मणिकारैरप्यनुमानखण्डे सहजशक्तिवादे** जनकत्वस्य केवलान्वयित्वेनेत्यादेरुक्तत्वात्। न च परमाणुपरिमाणस्य कार्यहेतुत्वेन तत्रैव तल्लक्षणमतिव्याप्तमिति वाच्यम्; परमाणुपरिमाणे रूपं नास्तीति संयुक्तसमवेतसमवेतविशेषणविशेष्यभावजन्यप्रतीतौ सम्बन्धघटकत्वेन तस्यापि हेतुत्वात्। न च परमाणुपरिमाणस्यातीन्द्रियत्वात् कथं तत्र रूपाभावः प्रत्यक्ष इति वाच्यम्; संसर्गाभावस्याप्रत्यक्षत्वे प्रत्यक्षप्रतिबन्धकत्वस्यैव तन्त्रत्वात्।

ननु तर्कितसत्त्वस्य यस्योपलम्भापादनं यत्र क्रियते तदभावस्तत्र प्रत्यक्ष इति वाच्यम्। उपलम्भापादनमपि तत्र क्रियते यत्रापादकमस्ति। यथा वायौ यदि रूपं स्यात् तर्ह्युपलभ्येत, महत्त्वसमानाधिकरणोद्भूतरूपस्य प्रत्यक्षत्वनियमात्। यथावदुद्भूतरूपवति परमाणौ यदि महत्त्वं स्यात् तर्ह्युपलभ्येत, उद्भूतरूपसमानाधिकरणमहत्त्वस्य प्रत्यक्षत्वनियमात्। तथेहापि।

यदि परमाणुपरिमाणे रूपं स्यात् तर्ह्युपलभ्येतेत्येतद्वक्तुमशक्यम्, आपादकाभावादिति चेत्—न—अणुत्वानधिकरणवर्त्युद्भूतरूपस्य प्रत्यक्षत्वनियमादित्येतस्यात्र समानत्वात्। नियामकसत्त्वेऽपि यद्यनुभवविरोधात् परमाणुपरिमाणे रूपाभावस्याप्रत्यक्षता स्यात् तर्ह्यनुभवविरोधादेवोद्भूतरूपे परमाणौ महत्त्वाभावस्य प्रत्यक्षता त्यज्यतामिति।

यद्वा 'चन्दने सौरभ्यमस्ती'त्यत्र परमाणुपरिमाणे 'रूपं नास्ती'त्यत्रापि कालिकालौकिकप्रत्यासत्तिस्स्वीकार्या। तथा च, संयुक्तसमवेतविशेषणविशेष्याभावरूपकालिकप्रत्यासत्तिघटकत्वेन तस्यापि हेतुत्वात्।

अथ वा यथा 'वायोः स्पर्श' इत्यत्र वायोरतीन्द्रियत्वेऽपि तन्निष्ठस्पर्शसाक्षात्कारप्रत्यासत्तिघटकत्वेन तस्याहेतुत्वं तथेहापि परमाणुपरिमाणे परमाणुत्वमिति प्रत्यक्षे परमाणुपरिमाणस्य प्रत्यासत्तिघटकत्वेन हेतुत्वमस्तु।

यद्वा यद्यन्नित्यपरिमाणवत् तन्नित्यं सङ्ख्यादिवदिति व्याप्तिग्रहजनकसामान्यलक्षण-

प्रत्यासत्तिघटकनित्यपरिमाणादिर्हेतुरिति । प्रत्यक्षधर्मस्यैव सामान्यप्रत्यासत्तित्वं नातीन्द्रियधर्मस्येति वाच्यम्; विनिगमकाभावात् ।

ननु यदीन्द्रियग्राह्यो यो धर्मः स धर्मस्तदिन्द्रियजन्यसाक्षात्कारे प्रत्यासत्तिरित्यवश्यं वाच्यम्; अन्यथा द्रव्यमिति शब्दत्वं प्रत्यासत्तिः स्यात् । तथा च न चाविवक्षया प्रत्यक्षधर्मस्यैव सामान्यप्रत्यासत्तित्वं सिद्धं नातीन्द्रियधर्मस्येति चेत्-न-द्रव्यमिति साक्षात्कारे घटत्वस्य, घट इति साक्षात्कारे द्रव्यत्वस्य चेत्यतिप्रसङ्गात् । द्रव्यत्वघटत्वयोरेकेन्द्रियग्राह्यत्वात् । न च यत्साक्षात्कारे यत्सामान्यं प्रत्यासत्तिः तत्साक्षात्कारस्य तत्सामान्यप्रकारकत्वनियमेन भवदुक्त-द्रव्यत्वातिप्रसङ्गः परिहरणीय इति वाच्यम्; तर्ह्यनेन नियमेन भवदुक्तशब्दत्वस्यासत्तित्वप्रसङ्गस्य निवारयितुं शक्यत्वेन प्रत्यक्षधर्मवदतीन्द्रियधर्मस्याप्यासत्तित्वसम्भवात् ।

किं च इतोऽप्यतीन्द्रियस्य प्रत्यासत्तिसिद्धिः; यत्सामान्यस्य यदिन्द्रियजन्यसाक्षात्कारे प्रत्यासत्तित्वमुच्यते तत्सामान्यस्य तदिन्द्रियजन्यसाक्षात्कारप्रकारत्वमेव तत्प्रत्यासत्तितायां प्रयोजकम्; न तदिन्द्रियग्राह्यत्वमपि, गौरवात् । न चापीन्द्रियधर्मासत्तित्वं त्वयैव कल्पितमिति वाच्यम्; पक्षधरेणाप्यतीन्द्रियप्रमात्वस्यासत्तित्वकल्पनात् । अन्ततः परमाणुपरिमाणमिति मानसिकसाक्षात्कारे परमाणुपरिमाणज्ञानं प्रत्यासत्तित्वेन करणमिति वक्तव्यम् । तथा च तादृशज्ञानलक्षणकालिक-प्रत्यासत्तिप्रविष्टत्वेन परमाणुपरिमाणस्यापि हेतुत्वमिति । किं बहुना, 'स्तम्भः पिशाचो न भवती'-त्यत्रेव 'घटः परमाणुपरिमाणं न भवती'ति साक्षात्कारे परमाणुपरिमाणान्योन्याभावस्यासत्तित्वेन जनकत्वेन तद्घटकपरमाणुपरिमाणस्य हेतुत्वमविकलमिति किमनुपपन्नम् ।

## कारणभेदनिरूपणम्

तच्च कारणं त्रिविधम्—समवाय्यसमवायिनिमित्तभेदात् ।

## समवायिकारणनिरूपणम्

ननु समवायिकारणस्य किं लक्षणम्? न तावत् समवायिकारणसमवेतत्वं लक्षणम्; तन्तुत्वस्य पटसमवायिकारणतापत्तेः । न चावधृतपदं (?) तदर्थमिति वाच्यम्; तन्तुत्वसाक्षात्कारं प्रत्युक्तविशेषणवत्त्वेनोक्तदोषानतिवृत्तेः । न च यत्कार्यसमवायिकारणं यत् तत्समवायित्वे सति तत्कार्यकारणत्वं विवक्षितमिति वाच्यम्; ज्ञानस्येच्छां प्रत्यसमवायिकारणतापत्तेः । न चेष्टापत्तिः, अपसिद्धान्तात् आत्ममनस्संयोगस्यैव बुद्ध्यसमवायिकारणताङ्गीकारादिति चेत्—न ।

## असमवायिकारणनिरूपणम्

संयोगजनकसंयोगात्ममनस्संयोगादृष्टवदात्मसंयोगप्रयत्नवदात्मसंयोगान्यात्मवृत्तिभिन्नत्वे

सति समवायिकारणसमवेतत्वे सति कारणत्वमसमवायिकारणस्य लक्षणम्। अत्र प्राथमिकविशेषणमसमवायिकारणभूतात्ममनस्संयोगेऽतिव्याप्तिवारकम्। शब्देत्यादि (?) विशेषणमनुकूलवाताकाशसंयोगेऽतिव्याप्तिवारकम्। समवायिकारणसमवेतत्वमिति विशेषणं वेमादावतिव्याप्तिवारकम्। कारणत्वपदं तन्तुत्वादिवारकम्। न चैवमप्येतल्लक्षणं घटसमवायिकारणकपालसमवेतभ्रमणेऽतिव्याप्तमिति वाच्यम्; कारणत्वशब्देन तत्कारणत्वे सति तत्कारणत्वस्य विवक्षितत्वात्। न च पटरूपासमवायितन्तुरूपस्य समवायिकारणसमवेतत्वाभावात् कथमेतदिति वाच्यम्, स्वकार्येण स्वकार्यसमवायिकारणेन वैकार्थसमवायित्वस्य तदर्थत्वात्।

## निमित्तकारणनिरूपणम्

समवायिकारणासमवायिकारणभिन्नत्वे सति कारणत्वं निमित्तकारणलक्षणम्।

## उपमितिनिरूपणम्

अनुमित्यनन्तरोद्दिष्टपरमप्रकृतोपमितेर्लक्षणमुच्यते — उपमानत्वेनोपमानजन्यत्वं लक्षणम्।

## तद्विभागनिरूपणम्

उपमितिर्द्वेधा — प्रमाभ्रमभेदात्। अत्र यथार्थत्वविशेषितोपमितित्वं सामान्यलक्षणं प्रमोपमितिलक्षणम्। तद्भिन्नोपमितित्वं भ्रमोपमितेर्लक्षणम्। यथार्थत्वं च पूर्वमेव निरुक्तमिति।

## शब्दनिरूपणम्

पदज्ञानत्वेन पदज्ञानजन्यत्वं शाब्दज्ञानलक्षणम्।

## तद्विभागनिरूपणम्

शाब्दज्ञानमपि द्विविधम् — भ्रमप्रमाभेदात्। यथार्थत्वविशेषितोक्तलक्षणं प्रमाशाब्दज्ञानलक्षणम्। प्रमान्यविशेषितोक्तलक्षणं प्रमा (?) शाब्दभ्रमलक्षणम्। तत्त्वेनेति (?) विशेषणं तदनुव्यवसायवारकम्।

ननु पदघटितलक्षणमुक्तम् — तदयुक्तम् — पदत्वस्य निर्वक्तुमशक्यत्वात्। न च वर्णसमूहः पदमिति वाच्यम्; पदाधारस्यस्य पदत्वापत्तेः, एकाक्षरपदेऽव्याप्तेश्च। सुबन्तत्वं पदत्वं न; तिङन्तेऽव्याप्तेः। न तिङन्तत्वं पदत्वम्; सुबन्तेऽव्याप्तेः, घट इत्यादावतिव्याप्तेश्चेति चेत् — न — यच्छ्रवणानन्तरनियमेनाधर्मः स्मर्यते तत्त्वं पदत्वमिति निर्वचनात्।

## प्रमाणनिरूपणम्

ननु साक्षात्कारादेर्लक्षणेनेतरव्यावृत्तिसिद्धिरस्तु। स्वरूपसिद्धौ किं प्रमाणमिति चेत् —

'साक्षात्करोमी' त्यनुव्यवसायस्य साक्षात्कारादिस्वरूपासिद्धौ प्रमाणत्वात्।

नन्वनुव्यवसायस्य प्रमाणत्वकथनमसङ्गतम्; प्रमाणत्वस्य निर्वक्तुमशक्यत्वात्। तथा हि — न तावत् प्रमाकरणत्वं प्रमाणत्वम्; विकल्पासहत्वात्। तथा हि – करणत्वशब्देनाविलम्बेन प्रमोत्पादकत्वातिशयवत्त्वं वा विवक्षितं उत व्यापारत्वं वा। आद्यपक्षे चक्षुरादीनां वा लक्ष्यत्वं उत चक्षुस्संयोगादेर्वा। नाद्यः; अभावात्। न द्वितीयः; अविलम्बेन प्रमानुत्पादकेऽन्यासक्तत्वादेव उत चक्षुर्घटसंयोगेऽव्याप्तेः। न च मनस्केन्द्रियसन्निकर्षः करणमिति वाच्यम्; सत्यपि मनस्केन्द्रिय-सन्निकर्षेऽन्धकारस्थघटादावालोकाभावदशायां प्रमानुत्पत्तेः। न चालोकसहकृतमनस्केन्द्रियसन्निकर्षः करणमिति वाच्यम्; संशयोत्तरप्रत्यक्षस्थले उक्तसन्निकर्षे सति विशेषदर्शनेऽनुमित्सायामनुमित्युत्पत्तेः। न द्वितीयः; चक्षुस्संयोगवति पटादावतिव्याप्तेः।

न च जन्यत्वातिरिक्तविशेषणाघटितानुभवत्वसाक्षाद्व्याप्ययत्किञ्चिद्धर्मावच्छिन्नकार्यप्रति-योगिकारणताश्रयत्वे सति व्यापारवत्त्वे सति यथार्थज्ञानजनकत्वं प्रमालक्षणमिति वाच्यम्, जन्य-त्वातिरिक्तविनाशित्वरूपविशेषणान्तरघटितानुभवत्वव्याप्ययत्किञ्चिद्धर्मावच्छिन्नकार्यताप्रतियोगिकार-णताश्रयत्वेन जन्यत्वातिरिक्तविशेषणाघटितानुभवत्वव्याप्यधर्मावच्छिन्नकार्यतानिरूपितकारणताश्रय-त्वाभावः चक्षुरादौ अव्याप्तेः।

**अत्रोच्यते** — विषयत्वावच्छिन्नानुव्यवसायान्यज्ञानकारणतानाश्रयत्वे सति व्यापारवत्वे सति सन्निकर्षत्वानवच्छिन्नयथार्थज्ञानजनकत्वं प्रमाणस्य लक्षणम्। विषयत्वावच्छिन्नेत्यादि-विशेषणं विषयेऽतिव्याप्तिवारकम्। अनुव्यवसायान्यपदमनुमित्यादिप्रमाणत्वेनाभिमतव्याप्तिनिश्चया-दावव्याप्तिवारकम्। व्यापारवत्वे सतीति विशेषणं व्यापारेऽतिव्याप्तिवारकम्। अन्तिमविशेषणं(?) दुष्टेन्द्रियादावतिव्याप्तिवारकम्। सन्निकर्षत्वानवच्छिन्नेति यथार्थज्ञानजनकत्वविशेषणं वायौ स्पर्श इति ज्ञानसन्निकर्षत्वेन जनकीभूतवायावतिव्याप्तिवारकम्।

यद्वा अनुभवं त्ववान्तरजात्यवच्छिन्नकार्यतानिरूपितकारणताश्रयत्वे सति व्यापारवत्वे सति यथार्थज्ञानजनकत्वं प्रमाणलक्षणम्।

पटकारणलक्षणमुच्यते — ईश्वरतज्ज्ञानेच्छाप्रयत्नादिकालादिनियतद्वृत्तिभिन्नत्वे सति तन्तुद्वयसंयोगपटप्रागभावान्यतन्तुमात्रवृत्त्यन्यत्वे सति, चेष्टादृष्टज्ञानेच्छाप्रयत्नान्यतन्तुसम्बन्धमात्र-वृत्त्यन्यत्वे सति नियतपूर्ववृत्तित्वं पटकारणलक्षणम्। पूर्ववृत्तित्वमित्युक्ते रासभेऽतिव्याप्तिः; तदर्थं नियतेति। तावत्युक्ते वेमादिरूपेऽतिप्रसङ्गः; तत्परिहाराय तन्तुसम्बन्धमात्रवृत्त्यन्यत्व इति। मात्रपदं तन्तुवेमसंयोगेऽतिव्याप्तिवारकम्। तावन्मात्रस्य लक्षणत्वे चेष्टादृष्टादावतिव्याप्तिः; तदर्थं चेष्टेत्यादि। तावत्येव कृते तन्तुरूपेऽतिव्याप्तिः; तद्व्युदासाय तन्तुमात्रवृत्त्यन्यत्व इति। अत्रापि

मात्रपदं तन्तुवेमसंयोगेऽव्याप्तिवारकम् । तावन्मात्रे उच्यमाने तन्तुद्वयसंयोगपटप्रागभावयोरव्याप्तिः; तदर्थं तन्त्वित्यादिविशेषणम् । आकाशे तद्गतपरिमाणादिव्यावृत्त्यर्थं नित्यतद्वृत्तिभिन्नत्व इति । ईश्वरतज्ज्ञानेत्यादिविशेषणं ईश्वरादावतिव्याप्तिवारकम् ।

यद्वा पटान्यथासिद्धान्यत्वे सति पटनियतपूर्ववृत्तित्वं पटकारणलक्षणम् । पटान्यथासिद्धत्वं च ज्ञानेच्छाप्रयत्नादृष्टचेष्टान्यतन्तुसम्बन्धमात्रवृत्तिपटप्रागभावतन्तुद्वयसंयोगान्यतन्तुमात्रवृत्तिदिकालकुविन्देश्वरतज्ज्ञानेच्छाप्रयत्नान्यनित्यतत्सम्बन्धान्यतमत्वमित्यन्यदेतत् । पूर्ववृत्तित्वं च प्रागभावोपलक्षितसमयसम्बन्धत्वं विवक्षितम्; अतो न पूर्वोक्तविकल्पावकाशः ।

## तद्विभागः

तच्च प्रमाणं चतुर्विधमित्याहुः – प्रत्यक्षानुमानोपमानशब्दभेदात् ।

## प्रत्यक्षनिरूपणम्

तत्र निर्दुष्टेन्द्रियत्वं प्रत्यक्षलक्षणम् । इन्द्रियत्वं च प्रागेव निरुक्तमिति । न च साक्षात्कारिप्रमाकरणं प्रत्यक्षमिति वाच्यम्; करणस्य प्रागेव दूषितत्वात् ।

## अनुमाननिरूपणम्

यथार्थानुमितिजनकत्वे सति व्याप्तिज्ञानत्वमनुमानस्य लक्षणम् । न तु व्याप्तिविशिष्टपक्षधर्मताज्ञानमनुमानमिति, अनुमानाभाससाधारणत्वात् । करणत्वस्य प्राग्दूषितत्वाच्च ।

## उपमाननिरूपणम्

अतिदेशवाक्यार्थनिश्चयत्वमुपमानलक्षणम् । वाक्यस्यातिदेशत्वमव्युत्पन्नपदोपेतत्वमित्यन्यदेतत् ।

## शब्दप्रमाणनिरूपणम्

आप्तोक्तवाक्यत्वं निश्चयत्वं शब्दप्रमाणलक्षणम् । अत्र वाक्यपदं पदसमूहपरम्, यथाभूतार्थोपदेष्टृत्वपरेणाप्तशब्देन शब्दाभासनिरासात् । बुद्धिस्वरूपं सप्रपञ्चं निरूपितम् ।

## सुखनिरूपणम्

इदानीं बुद्ध्यनन्तरोद्दिष्टसुखस्य लक्षणमुच्यते – सददृष्टजन्यगुणत्वं सुखत्वम् । गुणत्वमित्येतद्ध्वंसेऽतिव्याप्तिवारकम् ।

## दुःखनिरूपणम्

दुःखस्य दुरदृष्टजन्यगुणत्वं लक्षणम् ।

## इच्छानिरूपणम्

निवृत्तिरूपकार्यकारणभावाश्रयानाश्रितत्वरससमवेतसमवेतगुणत्वसाक्षाद्व्याप्यजात्यधिकरणत्वे सति विशेषगुणत्वमिच्छालक्षणम्। गुणत्वमित्युक्ते पटसंयोगेऽतिव्याप्तिः; तदर्थं विशेषेति। ईश्वरेत्यादि (?) पटरूपेऽतिव्याप्तिवारकम्। निवृत्तिरित्यादिविशेषणं ईश्वरज्ञानप्रयत्नयोरतिव्याप्तिवारकम्।

## द्वेषनिरूपणम्

अनिष्टसाधनताज्ञानत्वेनानिष्टसाधनताज्ञानजन्यं द्वेषस्य लक्षणम्। तत्त्वेनेति विशेषणमनुव्यवसायवारकम्।

## प्रयत्ननिरूपणम्

इच्छात्वेनेच्छाजन्यत्वसमानाधिकरणगुणत्वावान्तरजातिमत्त्वं प्रयत्नस्य लक्षणम्। अत्राद्यविशेषणमिच्छाविषयकज्ञानेऽतिव्याप्तिवारकम्। समानाधिकरणपदमीश्वरप्रयत्नेऽव्याप्तिवारकम्।

## धर्मनिरूपणम्

इन्द्रियग्राह्यगुणत्वावान्तरजात्यधिकरणभिन्नत्वे सति निषिद्धकर्माजन्यविशेषगुणत्वं धर्मस्य लक्षणम्। इन्द्रियग्राह्यनिषिद्धविशेष्येति विशेषणानि क्रमेण सुखाधर्मात्मपरिमाणेष्वतिव्याप्तिवारकाणि।

Indira Gandhi National Centre for the Arts

## अधर्मनिरूपणम्

निषिद्धकर्मजन्यत्वमधर्मलक्षणम्।

## भावनानिरूपणम्

आत्मसमवेतत्वे सति संस्कारताधारत्वं भावनालक्षणम्। अत्राद्यपदं वेगेऽतिव्याप्तिवारकम्। इतरत् ज्ञानादिव्यावर्तकम्।

## नैमित्तिकद्रवत्वनिरूपणम्

तेजस्संयोगजन्यं [नैमित्तिकद्रवत्वलक्षणम]।

## सांसिद्धिकद्रवत्वनिरूपणम्

व्यावृत्तद्रव्यत्वे सत्यवान्तरजात्याधारत्वं सांसिद्धिकद्रवत्वलक्षणम्।

## द्रवत्वनिरूपणम्

द्रवत्वं च स्यन्दनासमवायिकारणतासमानाधिकरणगुणत्वसाक्षाद्व्याप्यजातिरित्यन्यदेतत्। आद्यविशेषणं नैमित्तिकद्रवत्वेऽतिव्याप्तिवारकम्। जलेत्यादि(?)परमाणावतिव्याप्तिवारकम्।

## सत्तानिरूपणम्

द्रव्यगुणकर्मसामान्यविशेषसमवायाभावानामनुक्तानां विशेषलक्षणानां मध्ये जातिगर्भलक्षणान्यसङ्गतानि। जातीनामशक्यनिर्वचनीयत्वादिति चेत् — न — जातीनां निर्वक्तुं शक्यत्वात्। तथाहि — द्रव्यगुणवृत्तिजातिः सत्ता।

सत्तासाक्षाद्व्याप्यजातिस्त्रिधा — द्रव्यत्वकर्मत्वगुणत्वभेदात्।

## द्रव्यत्वनिरूपणम्

तत्र द्रव्यत्वं नाम घटवृत्तिसत्तासाक्षाद्व्याप्यजातिः। साक्षाद्व्याप्यत्वं नाम तद्व्याप्याव्याप्यत्वे सति तद्व्याप्यत्वमित्यन्यदेतत्।

## मतान्तरं, तत्खण्डनं च

यत्तु — गगनारविन्दासमवेतत्वे सति नित्यगन्धासमवेतत्वं द्रव्यत्वमिति — **तन्न** — गन्धासमवेतत्वमित्यत्र समवायिसम्बन्धेन गन्धावृत्तित्वमित्यर्थो वाच्यः। तथा चावृत्तित्वेनातिप्रसङ्गवारणे सति शेषवैयर्थ्यात्।

## तद्विभागः

द्रव्यत्वसाक्षाद्व्याप्यजातयः षड्विधाः — पृथिवीत्वाप्त्वतेजस्त्ववायुत्वात्मत्वमनस्त्वभेदात्।

## पृथिवीत्वनिरूपणम्

तत्र पृथिवीत्वं नाम घटवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिः। साक्षात्पदं घटत्ववारकम्।

## अप्त्वनिरूपणम्

स्नेहसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिरप्त्वम्।

## तेजस्त्वनिरूपणम्

उष्णस्पर्शसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिस्तेजस्त्वम्।

## वायुत्वनिरूपणम्

रूपासमानाधिकरणस्पर्शसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिः वायुत्वम्।

## आत्मत्वनिरूपणम्

विभुमात्रवृत्तिजातिरात्मत्वम्।

## मनस्त्वनिरूपणम्

अणुमात्रवृत्तिजातिः मनस्त्वम् । अनेन मार्गेण पृथिवीत्वावान्तरजातिनिरुक्तिरूहनीया ।

## गुणत्वनिरूपणम्

रूपवृत्तिसाक्षाद्व्याप्यजातिर्गुणत्वम् ।

## तद्विभागः

गुणत्वसाक्षाद्व्याप्यजातयश्चतुर्विंशतिधा — रूपत्वरसत्वगन्धत्वस्पर्शत्वसङ्ख्यात्वपरिमाणत्व-पृथक्त्वसंयोगत्वविभागत्वपरत्वापरत्वगुरुत्वद्रवत्वस्नेहत्वशब्दत्वबुद्धित्वसुखत्वदुःखत्वेच्छात्वद्वेषत्वप्रयत्न-त्वधर्मत्वाधर्मत्वसंस्कारत्वभेदात् ।

## रूपत्वनिरूपणम्

तत्र चक्षुर्मात्रग्राह्यगुणत्वसाक्षाद्व्याप्यजातिः रूपत्वम् ।

## रसत्वनिरूपणम्

रसनग्राह्यगुणत्वसाक्षाद्व्याप्यजातिः रसत्वम् ।

## गन्धत्वनिरूपणम्

घ्राणग्राह्यगुणत्वसाक्षाद्व्याप्यजातिर्गन्धत्वम् ।

## स्पर्शत्वनिरूपणम्

त्वङ्मात्रग्राह्यगुणत्वसाक्षाद्व्याप्यजातिः स्पर्शत्वम् ।

## सङ्ख्यात्वनिरूपणम्

द्व्यणुकपरिमाणसमवायिकारणतासमानाधिकरणजातिः सङ्ख्यात्वम् ।

## परिमाणत्वनिरूपणम्

परिमाणत्वं नाम कालवृत्तिद्विष्टावृत्तिगुणत्वसाक्षाद्व्याप्यजातिः । कालवृत्तिपदं शब्दत्वेऽतिव्याप्तिवारकम् । साक्षाद्व्याप्यकालवृत्तिपदं * शब्दत्वेऽतिव्याप्तिवारकम् । साक्षाद्व्याप्यपदं परिमाणत्वावान्तरजातिवारकम् । द्विष्टावृत्तिपदं संयोगत्वेऽतिव्याप्तिवारकम् ।

## पृथक्त्वनिरूपणम्

सङ्ख्याभिन्नत्वे सति द्विष्टाद्विष्टोभयवृत्तित्वे सति गुणत्वावान्तरजातिः पृथक्त्वम् ।

---

* 'द्विष्टावृत्तिगुणत्वव्याप्यजातिरि'त्येतावन्मात्रोक्तविति तदाशयः । तथा च, यौगपद्येन सक्षाद्व्याप्यत्वस्य कालवृत्तित्वस्य चादानेऽतिव्याप्तीत्यर्थः ॥

जातिः पृथक्त्वमित्युक्ते द्रव्यत्वेऽतिप्रसक्तिः; तदर्थं गुणत्वेति। तावन्मात्र उच्यमाने संयोगत्वेऽतिव्याप्तिः; अतोऽद्विष्टेति। तावत्युक्ते परिमाणत्वेऽतिव्याप्तिः; तदर्थं द्विष्टेति। सङ्ख्याभिन्नत्वेति विशेषणं सङ्ख्यावारकम्।

## संयोगत्वनिरूपणम्

कर्मजनकतासमानाधिकरणकालवृत्तिगुणत्वसाक्षाद्व्याप्यजातिः संयोगत्वम्। आद्यविशेषणं सङ्ख्यावारकम्। इतरत् गुरुत्वेऽतिप्रसङ्गवारकम्।

## विभागत्वनिरूपणम्

संयोगनिरूपितकार्यकारणभावाश्रयवृत्तिशब्दसमवायिकारणतासमानाधिकरणगुणत्वसाक्षाद्व्याप्यजातिः विभागत्वम्। अत्र प्राथमिकविशेषणं शब्दत्वसंयोगयोरतिव्याप्तिवारकम्। द्वितीयं तु गुरुत्ववारकम्।

## परत्वनिरूपणम्

परत्वं नामापरत्वावृत्तित्वे सति कारणगुणपूर्वकवृत्तित्वे सति विभुवृत्तिवृत्तिभिन्नत्वे सति गुणत्वसाक्षाद्व्याप्यजातिः। अत्रापरत्वेति कारणेत्यादि विभ्वित्यादिविशेषणानि क्रमेणापरत्वरूपत्वज्ञानत्वातिव्याप्तिवारकाणि।

## अपरत्वनिरूपणम्

अपरत्वेतरावृत्तित्वे सति अपरत्ववृत्तिजातिरपरत्वम्। पदप्रयोजनं तु स्पष्टमेव।

## गुरुत्वनिरूपणम्

विभुवृत्त्यतीन्द्रियग्राह्यगुणत्वसाक्षाद्व्याप्यजातिः गुरुत्वम्। विभ्वित्यादिविशेषणं कर्मत्वेऽतिव्याप्तिवारकम्। इतरत रूपत्वादिवारकम्।

## द्रवत्वनिरूपणम्

स्यन्दनासमवायिकारणतासमानाधिकरणगुणत्वसाक्षाद्व्याप्यजातिः द्रवत्वम्। साक्षाद्व्याप्यपदं सांसिद्धिकद्रवत्वादिवारकम्।

## स्नेहत्वनिरूपणम्

जलेतरावृत्तिवृत्तित्वरहितगुणत्वसाक्षाद्व्याप्यजातिः स्नेहत्वम्। जातिःस्नेहमित्युक्ते द्रव्यत्वेऽतिव्याप्तिः; तदर्थं गुणत्वसाक्षाद्व्याप्येति। तावत्युक्ते रूपत्वेऽतिव्याप्तिः; तत्परिहाराय जलेत्यादिविशेषणम्। आद्यवृत्तिपदमसम्भववारकम्। साक्षात्पदं सांसिद्धिकद्रव्यत्वेऽतिव्याप्तिवारकम्।

## शब्दत्वनिरूपणम्

आकाशविशेषगुणवृत्तिगुणत्वसाक्षाद्व्याप्यजातिः शब्दत्वम्। आकाशपदं रूपत्वादिवारकम्। विशेषगुणपदं संयोगत्वेऽतिव्याप्तिवारकम्।

## बुद्धित्वनिरूपणम्

इच्छाप्रयत्नोभयव्यावृत्तत्वे सतीश्वरविशेषगुणवृत्तित्वे सति गुणत्वसाक्षाद्व्याप्यजातिः बुद्धित्वम्। साक्षात्पदं साक्षात्कारत्ववारकम्। प्राथमिकपदं प्रयत्नत्वादिवारकम्।

## सुखत्वनिरूपणम्

सदद्दष्टजन्यवृत्तिगुणत्वसाक्षाद्व्याप्यजातिः सुखत्वम्।

## दुःखत्वनिरूपणम्

दुःखत्वं नाम दुरदृष्टजन्यवृत्तिगुणत्वसाक्षाद्व्याप्यजातिः।

## इच्छात्वनिरूपणम्

इष्टसाधनताज्ञानाधिकरणक्षणव्यवहितोत्तरक्षणे इष्टसाधनताज्ञानजन्यतासमानाधिकरण-गुणत्वसाक्षाद्व्याप्यजातिरिच्छात्वम्। अत्राद्यपदं प्रयत्नत्वादिवारकम्।

## द्वेषत्वनिरूपणम्

अनिष्टसाधनताज्ञानाधिकरणव्यवहितोत्तरक्षणेऽनिष्टसाधनताज्ञानजन्यवृत्तिगुणत्वसाक्षाद्व्याप्यजातिः द्वेषत्वम्। इच्छात्वद्वेषत्वयोभयत्रिरुक्तावपि ज्ञानावृत्तीति विशेषणमावश्यकम्। अन्यथा ज्ञानत्वे एवातिप्रसङ्ग इति।

## प्रयत्नत्वनिरूपणम्

इच्छात्वेनेच्छाजन्यवृत्तिगुणत्वसाक्षाद्व्याप्यजातिः प्रयत्नत्वम्।

## धर्मत्वनिरूपणम्

सुखत्वावच्छिन्नकार्यतानिरूपितकारणतासमानाधिकरणगुणत्वसाक्षाद्व्याप्यजातिः धर्मत्वम्।

## अधर्मत्वनिरूपणम्

दुःखत्वावच्छिन्नकार्यतानिरूपितकारणताकवृत्तिगुणत्वसाक्षाद्व्याप्यजातिरधर्मत्वम्।

## संस्कारत्वनिरूपणम्

भावनावृत्तिगुणत्वसाक्षाद्व्याप्यजातिः संस्कारत्वम् । एवमुक्तजात्यवान्तरजातिनिरुक्तिरप्यापादनीया ।

## कर्मत्वनिरूपणम्

अनित्यमात्रवृत्तिसाक्षाद्व्याप्यजातिः कर्मत्वम् । एवं तदवान्तरजातिनिरुक्तिरपि विज्ञेया ॥

मीमांसाद्वयतर्कशास्त्रसहितव्याख्यानशिक्षापटो-
वादीन्द्राभिधचिट्टिभट्टविदुषः शिष्येण पुत्रेण च ।
तिप्पाभट्टविपश्चिता विरचिता ह्यानवद्या [कृति]-
र्युक्त्या लक्षणराजिरप्रतिहता न्यायाम्बुधीनां मता ॥

इति श्रीमत्तिप्पभट्टविरचिता लक्षणराजिस्सम्पूर्णा

*श्रीः श्रीः श्रीरस्तु ॥

---

*पुष्पिकाऽनन्तरं इमाः पङ्क्तयः उपलभ्यन्ते "मुक्के तिम्मणाचार्यपुत्रवेङ्कटाचार्यस्येदं पुस्तकम् ।

तारणाब्दे सिते पक्षे पुण्ये मासि भगोदये ।
लिलेख वेङ्कटः पूर्णां लक्ष्मराजिं हरेर्दिने ॥"

IGNCA RAR
ACC. No. 550

Indira Gandhi National Centre for the Arts

# शुद्धाशुद्धपत्रिका

| अशुद्धम् | पृष्ठम् | पङ्क्तिः | शुद्धम् |
|---|---|---|---|
| (तत्र) | २ | १९ | [तत्र] |
| (शे) | ,, | २२ | [शे] |
| (न्न) | ,, | ,, | [न] |
| यथार्य | ,, | २३ | यथार्थ |
| (पद) | ,, | ,, | [पद] |
| (शे) | ३ | ८ | [शे] |
| (वारकम) | ,, | १५ | [ वारकम् ] |
| अन्यान्यो | ,, | १८ | अन्योन्या |
| (भावभिन्ना) | ,, | ,, | [भावभिन्ना] |
| गुणत्वाबान्तर | ९ | ७ | गुणत्वावान्तर |
| रूपे गतम् | ,, | ९ | रूपे (?) गतम् |
| विम्ववृत्ति | १० | ११ | विम्भवृत्ति |
| स्थितिस्थापक | ,, | १७ | स्थितस्थापक |
| ,, | ,, | १८ | ,, |
| प्रयव | ,, | ,, | प्रथम |
| इन्द्रियत्वविचार: | १६ | १ | इन्द्रियत्वविचारः |
| न तु | २१ | ११ | ननु |
| वाक्यघटितत्वेन | ,, | ,, | वाक्यत्वघटितत्वेन |
| जिज्ञासाकाङ्क्षावाक्य | ,, | १२ | जिज्ञासा आकाङ्क्षा । वाक्य |
| प्रागभावसाकाङ्क्षेति | ,, | १४ | प्रागभाव: आकाङ्क्षेति |
| का ... कोन्नयत्वेन | ,, | १५ | कार्यैकोन्नयत्वेन |
| वाक्यात्पूर्वं | ,, | १७ | वाक्यात्पूर्वं |
| बिशिष्ट | २३ | ५ | विशिष्ट |
| द्वितीय: | ,, | ,, | द्वितीय: |
| यत्रास्मदाद्यनुमित्सा | २४ | २४ | यत्रास्मदाद्यनुमित्सा |

Indira Gandhi National Centre for the Arts

सूचना — २१ पुटे दशमपङ्क्त्यनन्तरं "आकाङ्क्षानिरूपणम्" इति शीर्षकं भाव्यम् । तत्रैव पुटे अष्टादशपङ्क्त्यनन्तरं "योग्यतानिरूपणम्" इति च शीर्षकं भाव्यम् । तत्रैव पुटे अष्टादश-पङ्क्तिस्थ – 'न च धर्मशून्य' इति वाक्यात्पूर्वं किञ्चित् ग्रन्थो नष्ट इति तर्क्यते ॥

# नवत्वसङ्ख्याविचारः

(सम्पादकः — का. इ. गोविन्दाचार्यः)

पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैवेति **नैयायिकानां** सिद्धान्तः।

ननु नवैवेति विशेषणमतिरिक्तद्रव्यव्यवच्छेदार्थमिति वक्तव्यम्, प्रयोजनान्तराभावात्। तत्र व्यवच्छेदार्थत्वं वदता वक्तव्यम्, अतिरिक्तद्रव्यं प्रसिद्धं न वा। नाद्यः, प्रसिद्धस्य निषेधायोगात्। न द्वितीयः, प्रतियोग्यप्रसिद्ध्या अभावस्य सुतरामप्रसिद्धत्वादिति चेत् नायं दोषः। द्रव्यत्वं पृथिव्यादिनवान्यतमत्वव्याप्यमिति परिज्ञानार्थत्वात्। नच नवानामपि द्रव्याणां निर्देशमात्रादेव द्रव्यत्वं पृथिव्यादिनवान्यतमत्वव्याप्यमित्यवगन्तुं शक्यत्वात् तद्वैयर्थ्यं स्यादेवेति वाच्यम्। तदभावे यत्र द्रव्यत्वं तत्र पृथिव्यादिनवान्यतमत्वं इति व्याप्यव्यापकभावस्यैवावगन्तुमशक्यतया तद्वैयर्थ्यशङ्कानवकाशात्।

नन्वन्धकाराख्ये दशमद्रव्ये द्रव्यत्वरूपव्याप्यसत्त्वेन पृथिव्याद्यन्यतमत्वरूपव्यापकनिवृत्त्या व्यभिचारः स्यात्। ननु तस्य द्रव्यत्वमेव नास्ति, कुतो व्यभिचारः स्यादिति चेत् — तत्र वक्तव्यम्, किं द्रव्यलक्षणाभावात् द्रव्यत्वं नास्ति प्रमाणाभावाद्वा इति। आद्येऽपि किं समवायिकारणत्वरूपद्रव्यलक्षणाभावात् द्रव्यत्वं नास्ति, आहोस्वित् गुणाश्रयत्वाभावात्, अथवा क्रियाश्रयत्वरूपलक्षणाभावात्। तत्र न तावदाद्यः पक्षः संभवति, समवेतकार्याधारत्वस्यापि समवायिकारणलक्ष्यत्वेनान्धकारस्यापि स्वसमवेतनीलरूपलक्षणकार्याधारत्वेन समवायिकारणत्वस्यापह्नोतुमशक्यत्वात्। नापि द्वितीयः कल्पः, नीलरूपलक्षणगुणाश्रयत्वात्। नापि तृतीयः, तमसोऽपि चलनाश्रयत्वात्। न च तमसो गुणाश्रयत्वे क्रियाश्रयत्वे च प्रमाणमेव नास्तीति वाच्यम्। 'संविदेव हि भगवती विषयसत्तोपगमे नः शरणम्' इति सर्वतान्त्रिकसिद्धान्तानुरोधेन 'नीलं तमः चलति' इति प्रत्यक्षस्यैव प्रमाणत्वात्। न च तज्ज्ञानं भ्रमरूपमिति वाच्यम्। शुक्तौ रजतज्ञानानन्तरं 'नेदं रजतम् किंतु शुक्तिः' इति बाधज्ञानवदत्रापि 'तमो न नीलम्' 'न चलति तमः' इति बाधज्ञानस्यैवाभावेन भ्रमस्य वक्तुमशक्यत्वात्। नापि मुख्यद्वितीयः। तमो द्रव्यं रूपित्वात् घटवत् इत्यनुमानस्यैव प्रमाणत्वात्।

नन्वास्तां तमसो द्रव्यत्वम्, तथापि क्लृप्तेष्वन्तर्भावः किं न स्यात्? तथा च पृथिव्याद्यन्यतमत्वरूपव्यापकस्यापि सत्त्वेन न व्यभिचार इति चेत् — नैष दोषः, विकल्पा-

* Thanjavur Sarasvati Mahal Mss. No. N. N. B. 1556 / D. 6654.

सहत्वात् । तथा हि—किं पृथिव्यामन्तर्भावः, आहोस्वित् जले, अथवा तेजसि, यद्वा वायौ, अथवा आकाशादिपञ्चके । नाद्यः, गन्धवत्त्वरूपपृथिवीलक्षणाभावेन पृथिव्यामन्तर्भावस्य वक्तुमशक्यत्वात् । न चाद्यक्षणावच्छिन्ने घटे अव्याप्त्यापत्त्या गन्धवत्त्वं पृथिवीलक्षणमेव न भवतीति न दोष इति वाच्यम् । गन्धवत्त्वशब्देन गन्धात्यन्ताभावानधिकरणत्वस्य विवक्षिततया तस्याद्यक्षणावच्छिन्नघटेऽपि सत्त्वेनाव्याप्तेरभावात् । नापि द्वितीयः कल्पः । शीतस्पर्शवत्त्वरूपजललक्षणाभावेन तत्रान्तर्भावासंभवात् । न च 'शीतं शिलातलम्' इति प्रतीत्या शीतस्पर्शवत्त्वस्य पृथिवीविशेषे शिलातलेऽपि सत्त्वेनातिव्याप्त्यापत्त्या तज्जललक्षणमेव न भवतीति वाच्यम् । जलसम्पर्कमहिम्ना संयुक्तसमवायेनैव जले गन्धवत्प्रतीयमानतया वस्तुतः शीतस्पर्शाभावेनातिव्याप्त्यनवकाशात् । नापि तृतीयः कल्पः । उष्णस्पर्शवत्त्वरूपतेजोलक्षणाभावेन तत्रान्तर्भावाभावात् । ननु सुवर्णाख्ये तेजस्युष्णस्पर्शाभावेनाव्याप्त्यापत्त्या नैतत्तेजोलक्षणमिति चेत् । न च सुवर्णं पार्थिवं पीतत्वात् हरिद्रावत् इत्यनुमानेन सुवर्णस्य पार्थिवत्वसिद्धेः तेजस्त्वमेव नास्तीति नाव्याप्तिरिति वाच्यम् । सुवर्णं तैजसमत्यन्तानलसंयोगे सत्यनुच्छिद्यमानद्रवत्वाधिकरणत्वात् । यत्र तेजस्त्वाभावः तत्रात्यन्तानलसंयोगे सत्यनुच्छिद्यमानद्रवत्वाधिकरणत्वाभावः, यथा घृतमिति व्यतिरेक्यनुमानेन तैजसत्वसिद्धेः । तथा चाव्याप्तिः दुर्वारेति चेत्—नैष दोषः । पीतरूपाश्रयोपष्टम्भकपार्थिवभागेनाभिभूतत्वेनोष्णस्पर्शवत्त्वसत्त्वेऽपि तदनुपलब्ध्युपपत्त्या अव्याप्त्यभावात् । तस्मात् न तेजस्यन्तर्भावः । नापि तुरीयः कल्पः । सदागतिमत्त्वात्, रूपित्वाच्च । अतो न वायावन्तर्भावः । नापि पञ्चमः कल्पः । अनित्यत्वात् । तस्मात् तमो नामातिरिक्तं द्रव्यान्तरं सिद्धम् । तथा च व्यभिचारो दुर्वार एवेति चेत्—अत्राभाति । तमो न रूपिद्रव्यं, आलोकासहकृतचक्षुर्ग्राह्यत्वात्, आलोकाभाववत् इत्यनुमानेन रूपवत्त्वप्रत्ययस्य बाधितविषयत्वात् ।

इति नवत्वसङ्ख्याविचारः समाप्तः ॥

# आत्मत्वजातिविचारः

(सम्पादकः – का. इ. गोविन्दाचार्यः)

नन्वात्मत्वजातौ किं प्रमाणम्? अथ ज्ञानसमवायिकारणतावच्छेदकत्वेनात्मत्वासिद्धिः। कथमन्यथा आत्मभिन्ने ज्ञानं नोत्पद्यते इति चेत् न। आत्मभिन्ने हि स्मृतेरनुभवस्य वा उत्पत्तिरापद्येत। न तावदाद्यः। स्मृतिं प्रति पूर्वानुभवजन्यसंस्कारस्य समवायघटितसामानाधिकरण्यप्रत्यासत्त्याऽवश्यहेतुत्वेन तत्र संस्काराभावादेव स्मृत्यनुत्पत्तेः। न द्वितीयः। अनुभवो हि अनुमितिः वा, शाब्दी वा, उपमितिः वा नाद्यः; समवायघटितसामानाधिकरण्यप्रत्यासत्त्या परामर्शस्य हेतुत्वेनात्मभिन्ने तद्विरहेण समवायेनानुमित्यनुत्पादात्। न द्वितीयः, शाब्दबुद्धिं प्रति समवायघटितसामानाधिकरण्यप्रत्यासत्त्या पदजन्यपदार्थोपस्थित्यादेः हेतुत्वेन तदभावादेव शाब्दानुत्पत्तेः। न तृतीयः; सादृश्यज्ञानस्य समवायघटितसामानाधिकरण्यप्रत्यासत्त्या उपमितिं प्रति जनकत्वेनात्मभिन्ने उपमित्यनुत्पत्तेः।

नन्वात्मभिन्ने समवायेन प्रत्यक्षोत्पत्तिवारणाय जन्यज्ञानत्वावच्छिन्नं प्रत्यात्मत्वेन हेतुत्वम्, चक्षुस्संयोगादीनां लौकिकविषयतया चाक्षुषं प्रति समवायेन विषयनिष्ठतयैव हेतुत्वेन तेषां समवायेन ज्ञानोत्पत्तिनियामकत्वात्। न च समवायेन द्रव्यचाक्षुषत्वावच्छिन्नं प्रति स्वप्रतियोगिचक्षुर्जनकादृष्टवत्वसंबन्धेन चक्षुस्संयोगादीनामात्मनिष्ठतयैव हेतुत्वमिति वाच्यम्। तथा सति घटादिचक्षुस्संयोगसत्त्वे पटादिचाक्षुषस्योत्पत्तिवारणाय समवायेन तत्तद्द्रव्यचाक्षुषं प्रति स्वप्रतियोगिचक्षुर्जनकादृष्टवत्त्वसंबन्धे तत्तद्द्रव्यनिष्ठचक्षुस्संयोगानां विशिष्य हेतुत्वं वाच्यमित्यनन्तकार्यकारणभावकल्पनाप्रसङ्गात्। चक्षुस्संयोगादीनां विषयनिष्ठतया हेतुत्वकल्पने तु न द्रव्यभेदेनानन्तकार्यकारणभावकल्पनात् द्रव्यत्वावच्छिन्नलौकिकविषयतासंबन्धेन चैत्रीयचाक्षुषत्वावच्छिन्नं प्रति चैत्रीयचक्षुस्संयोगत्वादिना हेतुत्वसंभवात्। तव तत्रापि चैत्रमैत्रशरीराणामपि चाक्षुषविषयतया चैत्रमैत्रादिभेदेन घटपटादिभेदेन च द्रव्यचाक्षुषत्वावच्छिन्नं प्रति चक्षुस्संयोगादीनां हेतुत्वमिति विशेषात्। अतः समवायेनात्मभिन्ने ज्ञानाद्युत्पत्तिवारणाय जन्यज्ञानत्वावच्छिन्ने तादात्म्येनात्मत्वेन हेतुत्वमित्यात्मत्वासिद्धिरप्यवर्जनीया।

मैवम्। सुषुप्तिकालावच्छेदेन ज्ञानोत्पत्तिवारणायात्ममनोयोगस्य विजातीयत्वेन हेतुत्वमावश्यकं वाच्यम्। तत्र च कार्यकारणयोः समवायः प्रत्यासत्तिः तद्विरहेणात्मभिन्ने समवायेन

---

* Tanjavur Sarasvati Mahal Mss. No. D. 6648 / S, K. 19.

ज्ञानानुत्पादात्। न च तादृशविजातीयसंयोगस्य मनस्यपि सत्त्वेन तत्र ज्ञानोत्पत्तिः स्यादिति तद्वारणाय जन्यज्ञानत्वावच्छिन्नं प्रति तादृशात्मत्वेन हेतुत्वं वाच्यम्। विजातीयसंयोगसंबन्धेन मनस्त्वेनैव हेतुतायाः कल्पनेनानातिप्रसङ्गात्। न च मनस्यपि तादृशसंयोगेन मनोऽस्ति। तादृङ्मनः मनस्संयुक्तमिति प्रतीत्यभावात्। एतेन मनस्त्वजातिरपि सुसिद्धा। न च विनिगमनाविरहः तादृशसंयोगस्य समवायेन आत्मनः तादात्म्येन च हेतुतामपेक्ष्य लाघवेन तादृशसंयोगसम्बन्धेन मनस्त्वेन हेतुताया एव न्याय्यत्वात्।

अथेच्छादीनामात्मभिन्ने समवायेनोत्पत्तिवारणाय समवायेनेच्छादिकं प्रति तादात्म्येनात्मत्वेन हेतुत्वमित्यात्मत्वसिद्धिरिति चेत् न। इच्छां प्रति ज्ञानस्य वृत्तिं प्रतीच्छायाः समवायघटितसामानाधिकरण्यप्रत्यासत्त्या हेतुत्वस्य क्लृप्तत्वेनानातिप्रसङ्गात्। न च सुखसमवायिकारणतावच्छेदकत्वेनात्मत्वसिद्धिरिति **दीधितिकृतां** युक्तिरेवादरणीयेति वाच्यम्। सुखं प्रति सामानाधिकरण्यप्रत्यासत्त्या धर्मस्य हेतुत्वस्य क्लृप्तत्वेनान्यत्र तद्विरहेणैव सुखस्यानुत्पादात्। न चादृष्टसमवायिकारणतावच्छेदकत्वेनात्मत्वसिद्धिः। गङ्गाजलसंस्कारजन्यस्य यागादिजन्यस्य वाऽदृष्टस्यात्मभिन्ने आपादनाभावात् तस्य सामानाधिकरण्यप्रत्यासत्त्या दानयागादिजन्यत्वात्। न चावच्छेदकतासंबन्धेन विलक्षणपुण्यादिकं प्रति समवायेन शरीरगङ्गाजलसंयोगादेः हेतुतायामपि तत्रैवात्मभिन्ने समवायेन तादृशपुण्याद्युत्पत्तिनियामकाभावादापत्तिवारणाय समवायेनादृष्टत्वावच्छिन्नं प्रति तादात्म्येनात्मनो हेतुत्वमिति वाच्यम्। तादृशगङ्गाजलसंयोगि शरीरं यदाऽऽत्मनः तदाऽऽत्मन्यपि तादृशगङ्गाजलसंयोगजन्यस्योत्पत्तिवारणायात्मत्वेन हेतुत्वोक्तावपि स्वप्रतियोगिशरीरनिरूपितविलक्षणसंयोगित्वसंबन्धेन गङ्गाजलसंयोगादेः हेतुतायाः आवश्यकत्वादुभयत्रानतिप्रसङ्गे आत्मत्वेन हेतुतायां मानाभावात्। न च द्वेषकारणतावच्छेदकत्वेनैवात्मत्वसिद्धिरिति वाच्यम्। फलद्वेषस्य सामानाधिकरण्यप्रत्यासत्त्या दुःखत्वादिज्ञानजन्यत्वेनोपायद्वेषस्य च सामानाधिकरण्यप्रत्यासत्त्या तत्रानिष्टसाधनताज्ञानजन्यत्वेन तद्विरहादेवान्यत्र द्वेषानुत्पादात्।

एतेन भावनाख्यसंस्कारजनकतावच्छेदकतया आत्मत्वसिद्धिरप्यपास्ता। भावनाख्यसंस्कारं प्रति सामानाधिकरण्यप्रत्यासत्त्या पूर्वानुभवादेः हेतुत्वेन तद्विरहादेवात्मभिन्ने तदनुत्पत्तेः। न चाहमहमिति प्रतीतिविषयतासिद्धम ........ तावच्छेदकात्मत्वं जातिरेवेत्यागतात्मत्वजातिरिति वाच्यम्। तादृशप्रतीतीनां ज्ञानादिविशिष्टस्य विषयत्वादित्यात्मत्वजातौ मानाभावः।

**अत्र ब्रूमः**। द्रव्यचाक्षुषादिकं प्रति चक्षुस्संयोगादिवदात्ममानसं प्रति सन्निकर्षविधया आत्ममनस्संयोगो हेतुरिति सर्वसिद्धम्। तथा चात्मत्वजातेरनभ्युपगमे ज्ञानवत् मानसं प्रति मनस्संयोगत्वादिना वा हेतुतेति वाच्यम्। तदेच्छावत् मानसादिकमादाय विनिगमनाविरह

इत्यात्मत्वजातिं स्वीकृत्यात्ममानसत्वमेव मनस्संयोगस्य कार्यतावच्छेदकं वक्तव्यमिति तत्कार्यतावच्छेदककोटिप्रविष्टतया आत्मत्वजातिसिद्धिः । न च द्रव्यत्वावच्छिन्नलौकिकविषयतासम्बन्धेन मानसत्वावच्छिन्नं प्रति मनस्संयोगत्वेन कारणत्वमिति वाच्यम् । मानसनिरूपितलौकिकविषयताया द्रव्यवृत्तित्वे मानाभावेन द्रव्यत्वावच्छिन्नमानसनिरूपितलौकिकविषयताया असिद्धत्वेन संबन्धाभावात् । आत्मत्वजात्यभ्युपगमे तु आत्मत्वावच्छिन्नविषयतासंबन्धेन मानसत्वमेव मनस्संयोगस्य कार्यतावच्छेदकं सम्भवति । न च मयापि द्रव्यत्वावच्छिन्नविषयतासंबन्धेन मनस्संयोगशून्यघटादावपि सत्त्वेन व्यभिचारप्रसङ्गात् । यदि चानयैव युक्त्या मानसस्य लौकिकविषयतासिद्धिः तदाप्यात्मत्वसिद्धिरप्रत्यूहैव । द्रव्ये मानसनिरूपितलौकिकविषयतास्वीकारमपेक्ष्य पदार्थसामान्यनिरूपिताया विषयताया आत्मत्वजातेश्च स्वीकारस्यैवोचितत्वात् ।

यद्वा ज्ञानाद्यभावकालीनमनस्संयोगदशायामात्मनो मानसवारणायात्ममानसं प्रति ज्ञानादीनां हेतुत्वं वाच्यम् । तत्र ज्ञानवत् मानसत्वस्य कार्यतावच्छेदकत्वे इच्छावत् मानसत्वादिकमादाय विनिगमनाविरहेण बहुतरकार्यकारणभावप्रसङ्ग इत्यत आत्मत्वजातिसिद्ध्या आत्ममानसत्वमेव ज्ञानादिकार्यतावच्छेदकं कल्प्यते । ज्ञानादीनां हेतुता तु ज्ञानत्वादिना लौकिकविषयतया मानसवत्त्वेन वेत्यन्यदेतत् । द्रव्यमानसत्वादिकं तु पूर्ववद्घटादिमानस एव व्यभिचारेण कार्यतावच्छेदकं न संभवतीति । किंच स्मृतिं प्रति पूर्वानुभवघटविशिष्टकर्मत्वविषयताभिन्नविषयताशालिप्रत्यक्षत्वादिना प्रतिबध्यता वाच्या । तथा च विषयभेदेन प्रतिबध्यप्रतिबन्धकभावकल्पनं भवतामप्यावश्यकमेव । न च स्वाव्यवहितपूर्ववृत्तित्वस्वसामानाधिकरण्योभयसंबन्धेन शाब्दविशिष्टत्वमेव सकलशाब्दसामग्रीसाधारणमनुगतप्रतिबन्धकतावच्छेदकं संभवतीति वाच्यम् । तादृशसंबन्धेन फलविशिष्टत्वेन सामग्रीप्रतिबन्धकताया अन्यत्र दूषितत्वात् ।

**अत्राह** । पदजन्यपदार्थोपस्थित्यादिकालीनप्रमित्यनन्तरं 'घटं शाब्दयामि' इत्याद्याकारकः शाब्दत्वाख्यजातिविशेषावलम्बी सार्वजनीनोऽनुव्यवसायः । तद्बलात् तादृशजातिसिद्धिः तदवच्छिन्नकारणतया शब्दस्य तज्ज्ञानस्य वा प्रमाणान्तरता निष्प्रत्यूहैव । अथवास्तु तावदेतादृशानुव्यवसायबलात् शाब्दत्वाख्यजातिविशेषः । स च मानसत्वव्याप्य एवोपेयते । तदवच्छिन्नसामग्रीकाले मानसत्वावच्छिन्नसामग्र्या आवश्यकत्वात् शाब्दसामग्र्यभावस्य मानसहेतुत्वसिद्धिः । एवं च शब्दस्य प्रमाणान्तर्भाव उपेयते, नतु प्रमाणान्तरतेति । नच शाब्दत्वस्य मानसत्वव्याप्यत्वेपि तदवच्छिन्नं प्रति पदजन्यपदार्थोपस्थित्यादीनां हेतुत्वकल्पनमावश्यकम् । अन्यथा तच्छून्यकालेपि शाब्दत्वावच्छिन्नापत्तेः । तथा च लाघवविरहात् तादृशजातिमति मानसत्वसत्त्वे मानाभाव इति वाच्यम् । विरुद्धमते शाब्दसामग्रीकाले मानसवारणाय तत्र शाब्दसामग्री-

प्रतिबन्धकत्वकल्पनाया आवश्यकत्वात्, व्याप्यमते तदकल्पनेन लाघवसंभवादिति चेत्—न। शाब्दत्वस्य मानसत्वव्याप्यमते भिन्नविषयकचाक्षुषादिसामग्रीकाले शाब्दबोधानुपपत्तिः। मानसं प्रति तादृशसामग्र्याः प्रतिबन्धकत्वस्य तदानीं शाब्दान्यमानसवारणाय क्लृप्तत्वात्। अतः तादृशसामग्रीप्रतिबन्धकताया शाब्दान्यमानसत्वमेव प्रतिबध्यतावच्छेदकं वाच्यम्। एवं च तादृशानां तत्सामग्रीप्रतिबध्यतावच्छेदककोटौ शाब्दान्यत्वस्याधिकस्य निवेशादवच्छेदकगौरवम्। शाब्दान्यमानसत्वयोः मिथो विशेषणविशेष्यभावेऽपि विनिगमनाविरहेण प्रतिबध्यप्रतिबन्धकभावबाहुल्यं च। एवं च सति मानसं प्रति सामग्रीप्रतिबन्धकत्वाकल्पनप्रयुक्तलाघवस्यापि नावकाशः। विजातीयपरामर्शेष्टसाधनताज्ञानयोः कारणत्वेनापत्तिविरहात्। तादृशज्ञाने तादृशवैजात्यादेः विरहात्। फलानुरोधित्वात् कल्पनायाः। व्यक्तिपौर्वापर्यनियमाय संयोगादीनां तत्त्वेनावश्यं कारणत्वे ईदृशसंयोगादीनां फलाभावेन हेतुत्वाकल्पनात्। तज्जनकीभूतपरामर्शाद्यनुत्पादेन तद्वारणसंभवाच्च। तदानीं तादृशज्ञाने मानाभावाच्च। अपि चात्मत्वजात्यनङ्गीकारे आत्मत्वाद्याकारकानुगतप्रत्ययानुपपत्तिः, तद्विषयस्य दुर्वचत्वात्। नेच ज्ञानत्वादिकमेव तस्य विषयः। तथा सति 'अहं ज्ञानी' इति शब्दस्य 'घटो घट' इत्यादिवत् पुनरुक्तत्वेन निराकाङ्क्षितत्वापत्तेः। किं चानुमितिं प्रति परामर्शस्य सामानाधिकरण्यप्रत्यासत्त्या हेतुत्वे पर्वतादिभेदेनानन्तकार्यकारणभावकल्पनप्रसङ्गः इति चैत्रमैत्रादिभेदेन परामर्शानुमित्योः कार्यकारणभावो वक्तव्यः। तथा चात्मभिन्ने समवायेनानुमितिवारणायात्मत्वेन हेतुतयात्मत्वजातिसिद्धिरिति।

**केचित्तु**—लौकिकविषयतासंबन्धेन मानसवद्गुणत्वावच्छिन्नं प्रति आत्मत्वेन हेतुत्वम्। कार्यकारणयोः समवायतादात्म्ये प्रत्यासत्ती। न तु जन्यज्ञानत्वावच्छिन्नं प्रति आत्मत्वेन हेतुत्वं गौरवात्। तथा च कारणतावच्छेदकतया आत्मत्वसिद्धिरिति वदन्ति।

**तन्न**। सुषुप्तिप्राक्कालीनज्ञानस्यापेक्षाबुद्धेश्च मानसत्वाभावेन तत्साधारण्याभावात्। ज्ञानादिकं प्रति परामर्शादीनां विशिष्य नियामकत्वेनान्यत्रापत्तिविरहे ईदृशकार्यकारणभावे मानाभावाच्च।

**प्रकाशकारादयस्तु**—सुखत्वावच्छिन्नं प्रति आत्मत्वेन जनकत्वं, न तु तादात्म्येन जनकतापेक्षया समवायेन तथात्वकल्पने गौरवादिति, सुखसमवायिकारणतावच्छेदकतया आत्मत्वसिद्धिः। न चैवमीश्वरात्मसाधारण्यभावेन तदात्मनो विभागानुपपत्तिः विभाजकोपाध्यभावात्। नित्यज्ञानैतादृशजातिभ्यां विभजने च दशमद्रव्यत्वापत्तिरिति वाच्यम्। ज्ञानत्वेनैव विभजनेन तदापत्तिविरहात्। न चैवमश्वमेधादिजन्यसुखस्याकस्मिकतापत्तिः नियामकाभावादिति वाच्यम्। विजातीयसुखं प्रति विलक्षणादृष्टवत्त्वसंबन्धेन हेतुत्वादाकस्मिकतापत्तिविरहादिति न काप्यनुपपत्तिरिति वदन्ति।

**तदप्यसत्** । सुखत्वावच्छिन्नं प्रति धर्मत्वापेक्षया ज्योतिष्टोमाश्वमेधजन्यसुखभेदेन तत्तद्वैजात्यान्तर्भावात् हेतुत्वकल्पनेनानन्तकार्यकारणभावकल्पनागौरवात् । तथा च ज्योतिष्टोमाश्वमेधादेः विलक्षणसुखत्वावच्छिन्नं प्रति जनकत्वे धर्मत्वेन च सुखत्वावच्छिन्नं प्रति जनकत्वे सर्वोपपत्तौ किमात्मनः कारणत्वकल्पनया इति । न च कीर्तनादिना तज्जन्यादृष्टनाशात् उदासीनादृष्टद्वारतः तादृशसुखोत्पत्तिः स्यादिति वाच्यम् । उदासीनस्यादृष्टस्य द्वारत्वाभावात् । इत्थं च तत्रादृष्टविरहेणाश्वमेधादितो न सुखोत्पत्तिरिति । न च तादृशादृष्टस्यैव सर्वत्र जनकत्वेन सर्वोपपत्तौ किं ज्योतिष्टोमादेः कारणत्वेनेति वाच्यम् । व्यापारेण व्यापारिणोऽनन्यथासिद्धेः । अन्यथा घटादिकं प्रति दण्डजन्यभ्रम्यादेः कारणत्वेनैवोपपत्तौ दण्डादेः कारणत्वं न स्यात् । 'ज्योतिष्टोमेन यजेत' इत्यादिना वेदेन बोधितहेतुत्वस्य गीर्वाणगुरोरप्यपह्नवयितुमशक्यत्वाच्च । न च धर्मस्य सुखत्वं कार्यतावच्छेदकं, अश्वमेधादेः विलक्षणसुखत्वमिति व्यापारव्यापारिणोरेकरूपं कार्यतावच्छेदकमिति व्याप्तिभङ्गप्रसङ्ग इति वाच्यम्; तादृशव्याप्तौ मानाभावात् ।

**परे तु** — सुखसमवायिकारणतावच्छेदकतया ईश्वरात्मसाधारणात्मत्वसिद्धिः । अन्यथा ज्ञानवत्त्वादिना विभजने विनिगमकाभावः स्यात् । न च तत्र सुखोत्पादः स्यादिति वाच्यम् । तत्रादृष्टविरहेणापत्तिविरहात् । न च नित्यस्य स्वरूपयोग्यस्येत्यादिव्याप्तिभङ्गप्रसङ्ग इति वाच्यम् । तत्र मानाभावेन इष्टत्वात् । न चादृष्टजनकत्वेनैवोपपत्तौ किमात्मत्वेनेति वाच्यम् । भावकार्यस्य समवायिकारणनियमादित्याहुः ।

**तन्न** । तथानियमे मानाभावात् । भावे वा जन्यसत्त्वाद्यवच्छिन्नं प्रति द्रव्यत्वेन हेतुतयैव तदुत्पत्तेः अदृष्टस्य गगनादिसाधारण्याभावादनापत्तौ लाघवेन द्रव्यत्वादेरेव तदवच्छेदकस्योचितत्वादिति दिक् ॥

इति आत्मत्वजातिविचारः समाप्तः ॥

Indira Gandhi National Centre for the Arts

# * त्वङ्मनोयोगस्य ज्ञानहेतुत्वखण्डनम्

( सम्पादकः — का. इ. गोविन्दाचार्यः )

त्वङ्मनोयोगस्य ज्ञानत्वावच्छिन्नं जन्यज्ञानत्वावच्छिन्नं प्रति वा हेतुत्वे मानाभावः । अथ स्वापोत्तरद्वितीयादिक्षणे ज्ञानोत्पत्तिवारणाय जन्यज्ञानं प्रति त्वङ्मनोयोगस्य हेतुत्वमावश्यकम् । आत्मनो विभुतया पुरीतति मनस्संयोगात्मकसुषुप्त्युत्पत्तिसमये पुरीतदवच्छेदेनात्ममनस्संयोगस्याप्युत्पत्तेः । आत्ममनस्संयोगं विना श्वासप्रश्वासहेतुजीवनयोनियत्नानुपपत्तेश्च । एतेनात्ममनस्संयोगस्यात्ममनस्संयोगत्वेन मनस्संयोगत्वेन वा नासमवायिकारणत्वम्, गौरवात्; अपि तु वैजात्येन, सुष्वापकालीनात्ममनःसंयोगे च नैतादृग्वैजात्यम्, तस्य फलबलकल्प्यत्वात् । सुषुप्तौ न ज्ञानोत्पत्तिरित्यपि परास्तम् । विजातीयात्ममनःसंयोगस्यासमवायिकारणस्य कार्यतावच्छेदकं न जन्यज्ञानत्वं, किंतु लाघवात् ज्ञानेच्छादिसाधारणं जन्यात्मविशेषगुणत्वम् । तथा च श्वासप्रश्वासहेतुजीवनयोनियत्नान्यथानुपपत्त्या विजातीयात्ममनस्संयोगस्यापि तदानीमावश्यकत्वात्, त्वङ्मनस्संयोगश्च तदा नास्ति । यदा मनः त्वचमपि परिहृत्य पुरीततिमनुविशति तदा सुषुप्तिरित्यभिधानात् । नच सुषुप्तिदशायां ज्ञानोत्पत्तिवारणाय जन्यज्ञानमात्रं प्रति प्राणमनस्संयोगस्यैवाभ्युपेयते, न तु त्वङ्मनोयोगस्येति वाच्यम् । त्वक्त्वप्राणत्वयोरेव जातिरूपतया विनिगमकाभावादिति ।

मैवम् । सुषुप्तिदशायां कीदृशज्ञानमापाद्यम्, न तावत् चाक्षुषादि, चक्षुरादिमनस्संयोगविरहादेव तदानीं तदनुपपत्तेः । नाप्यनुमित्यादि, परामर्शाद्यभावात् । नापि स्मृतिः, उद्बोधकस्य फलबलकल्प्यत्वात् । न चात्ममनस्संयोगस्य सत्त्वात् तदानीमात्मादिमानसापत्तिः अतस्तद्वारणाय जन्यज्ञानत्वावच्छिन्नं प्रति मानसत्वावच्छिन्नं प्रति वा त्वङ्मनोयोगस्य हेतुत्वमावश्यकमिति वाच्यम् । ज्ञानाद्यात्मकविशेषगुणाविषयकात्मादिमानसस्यालीकतया सुषुप्त्युत्पत्तिकाले ज्ञानादिविरहादेव सुषुप्त्यनन्तरमात्मादिमानसानुत्पत्तेः । सुष्वापप्रयोजकमनःक्रियोत्पत्तिकाले तादृशमनःपूर्वदेशविभागोत्पत्तिकाले वा तस्य ज्ञानादेराशुविनाशितया सुषुप्त्युत्पत्तिकाले चात्ममनस्संयोगस्यासमवायिकारणस्य पूर्वमभावादेव ज्ञानाद्यनुत्पत्तेः । न च मनःपूर्वदेशविभागकालोत्पन्नस्यापेक्षाबुद्ध्यात्मकज्ञानस्य सुषुप्त्युत्पत्तिकालेऽवस्थानसंभव इति वाच्यम् । तदानीमपेक्षाबुद्ध्यात्मक-

* T. M. S. S. M. Library, Tanjavur. D. 6653/J. L. 924.

ज्ञानोत्पादने मानाभावात् । अपेक्षाबुद्धेरपि [1]क्षणत्रयावस्थायित्वे मानाभावाच्च । न च सुष्वाप-प्रयोजकमनःपूर्वसंयोगनाशकालोत्पन्नज्ञानादेः सुषुप्तिदशायामप्यवस्थानसम्भव इति वाच्यम् । असमवायिकारणस्य कार्यसहभावेन हेतुतया मनःपूर्वसंयोगनाशदशायां ज्ञानोत्पादासंभवात् । न च यस्यासमवायिकारणस्य नाशात् कार्यनाशः तस्यैव कार्यसहभावेनासमवायिकारणत्वे मानाभाव इति वाच्यम् । त्वङ्मनोयोगस्यातिरिक्तस्य कारणत्वापेक्षया तावन्मात्रकल्पनाया एव लघुत्वात् । न वात्ममनस्संयोगस्यात्ममनस्संयोगत्वेन वा नासमवायिकारणत्वम्, किं तु लाघवात् संयोगत्वेन । तथा च यत्किञ्चित्संयोगे कार्यसहवर्तिमनस्त्वेवेति वाच्यम् । त्वङ्मनोयोगस्यातिरिक्तकारणत्वकल्पना-पेक्षया आत्ममनस्संयोगवृत्तिवैजात्येनैव कार्यसहवृत्तितया समवायिकारणत्वमात्रकल्पनाया एव लघुत्वात् । न चात्ममनःसंयोगस्य कार्यसहवर्तितया हेतुत्वेऽपि यत्र मनःक्रियया न पुरीतति मनस्संयोगात्मकसुषुप्त्यादयः, किं तु पूर्वदेशयुक्त्यैव मनः पुरीतति संयोगरूपः सुष्वापः तत्र स्वापोत्पत्तिकाले ज्ञानोत्पत्तिसंभव इति वाच्यम् । तादृशपुरीतति क्रियया पुरीतति मनस्संयोगस्य सुषुप्तित्वविरहात् । यदा मनः त्वचमपि परिहृत्य पुरीततिमनुविशति तदा सुषुप्तिरित्यभिधानात् ।

Gandhi National Centre for the Arts

**केचित्तु**— सुष्वापानन्तरज्ञानोत्पादवारणाय जन्यज्ञानत्वावच्छिन्नं प्रत्यात्मनः संयोगस्येव सुष्वापकालीनमनस्संयोगव्यावृत्तवैजात्येन हेतुत्वमुपेयते, न तु त्वङ्मनोयोगस्य । न च विनिगमका-भावात् त्वङ्मनोयोगस्यापि वैजात्येन हेतुत्वं दुर्वारम्, ज्ञानेच्छासाधारणजन्यात्मविशेषगुणत्वावच्छिन्नं प्रत्यात्ममनस्संयोगस्य पृथगसमवायिकारणतायाः तत्राप्यावश्यकत्वादिति वाच्यम् । आत्ममनस्संयोगस्य वैजात्येन हेतुत्वे समवायस्य प्रत्यासत्तितया प्रत्यासत्तिलाघवात् त्वङ्मनस्संयोगस्य हेतुत्वेऽवच्छेदक-त्वस्यैव प्रत्यासत्तित्वे गौरवात् । कर्मसंयोगजन्यतावच्छेदकवैजात्यस्याधिकस्य कल्पने गौरवापत्ते-श्चेत्याहुः ।

**तदसत्** । उक्तक्रमेणैव सुषुप्त्यनन्तरं ज्ञानोत्पत्त्यादेः वारणसम्भवेनात्ममनस्संयोगस्या-प्यतिरिक्तकारणत्वकल्पने मानाभावात् ।

**मिश्रास्तु**— सुषुप्त्यनन्तरं ज्ञानोत्पत्तिवारणाय चर्ममनस्संयोग एव जन्यज्ञानहेतु-रभ्युपेयते, न तु त्वङ्मनोयोगः । न च विनिगमकाभावविरहः । जन्यज्ञानसामान्ये त्वङ्मनोयोग-हेतुत्वे रसादिसाक्षात्कारकाले त्वचा द्रव्यग्रहापत्तेः । सामान्यसामग्र्याः त्वङ्मनोयोगस्यावश्यक-त्वात् रसादिसाक्षात्कारसामग्र्याः त्वङ्मनोयोगस्यावश्यकत्वात् रसादिसाक्षात्कारसामग्र्याः प्रतिबन्धकत्वाभ्युपगमे सति गौरवादित्याहुः ।

---

1 'क्षणत्रयावस्थयपि' इति मातृकापाठः न सङ्गच्छते ।

**तदसत्** । रससाक्षात्कारकाले द्रव्येण समं त्वक्सन्निकर्षे एव मानाभावेन तदभावादेवानन्तरं ज्ञानानुत्पादसंभवे चर्ममनोयोगस्यापि हेतुत्वे मानाभावात् ।

**केचित्तु**—सुषुप्त्यनन्तरं ज्ञानोत्पत्तिवारणाय शरीरमनस्संयोग एव जन्यज्ञानसामान्ये मानससामान्ये वा हेतुरुपेयते, न तु त्वङ्मनोयोगः । शरीरसंयोगस्य त्वक्संयोगव्याप्यतया सुषुप्तिदशायां त्वङ्मनोयोगस्येव शरीरमनोयोगस्यापि हेतुत्वात् । न च शरीरत्वमपेक्ष्य त्वक्त्वस्य जातिरूपतया लघुत्वेन त्वङ्मनोयोग एव हेतुरिति वाच्यम् । शरीरमनस्संयोगस्य हि न शरीरमनस्संयोगत्वेन हेतुत्वं धृतचारित्वप्रवेशः (?) । अपि तु शरीरनिष्ठतया मनस्संयोगत्वेन समवायावच्छेदकत्वघटितसामानाधिकरण्ये प्रत्यासत्तिः । कारणादिशि समवायः कार्यदिश्यवच्छेदकत्वम्, यद्वा संयोगसंबन्धेन शरीरनिष्ठतया मनस्त्वेन हेतुत्वं कार्यतावच्छेदकसंबन्धश्चावच्छेदकत्वम् । त्वङ्मनोयोगस्य हेतुत्वे त्वक्त्वसंयोगत्वयोरवच्छेदककोटिप्रवेशस्यावश्यकतया गौरवात् । न च त्वङ्मनोयोगस्यापि त्वङ्मनोयोगत्वेन न हेतुत्वम्, अपि तु वैजात्येन, अतो न त्वक्त्वसंयोगत्वयोः प्रवेश इति वाच्यम् । तथाप्यतिरिक्तवैजात्यकल्पनामपेक्ष्य मनस्त्वेनैव हेतुतायाः लघुत्वात् ।

**तदप्यसत्** । स्वापोत्तरज्ञानप्रसङ्गस्योक्तक्रमेणासंभवात् । शरीरमनस्संयोगस्याप्यतिरिक्तकारणत्वे मानाभावादिति सङ्क्षेपः ॥

इति त्वङ्मनोयोगस्य ज्ञानहेतुत्वखण्डनं समाप्तम् ॥

---

Indira Gandhi National Centre for the Arts

IGNCA RAR
ACC. No. 550

Indira Gandhi National
Centre for the Arts